अथहिरंण्यकेशीसूत्रेएकोनत्रिंशत्तिप्रश्न
॥प्रारंभः॥

हि०सू० मार्गानभ्युक्ष्याग्नावादधात्याज्यं विलाप्य पवित्रांतर्हितायामाज्यस्थाल्यामाज्यं निरूप्यो
दीचोंगारान्निरूह्य तेष्वधिश्रित्यावद्योत्य दर्भतरुणाभ्यां प्रत्यस्य त्रिः पर्यग्निकृत्वोदगु
२ द्वास्यांगारान्प्रत्यूह्योदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रे अग्नावाधाय॥ अ
ग॥१॥ ग्राम्याभिः परिदधात्यपरेणाग्निमुदीचीनकुंबां मध्यमां निदधाति दक्षिणेनाग्निं
संस्पृष्टां मध्यमया प्राचीनकुंबामुत्तरेणाग्निं संस्पृष्टां मध्यमया प्राचीनकुंबाम
परेणाग्निं प्राङ्मुखउपविशति दक्षिणतो यज्ञोपवीत्याचांतः कुमारउपविश्यान्वारभेतथ
परिषिंचत्यदितेनुमन्यस्वेति दक्षिणतः प्राचीनमनुमतेनुमन्यस्वेति पश्चादुदीचीनं सर
स्वतेनुमन्यस्वेत्युत्तरतः प्राचीनं देवसवितः प्रसुवेति सर्वतः प्रदक्षिणं परिषिच्ये
ध्ममरत्नीभ्यामादधात्ययं तइध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्धि वर्धय चास्मा
न्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेत्यथ दर्व्याजुहोत्युत्तरं परिधिसं राम
धि मनुं वहस्य दर्व्यां प्रजापतये मनवे स्वाहेति मनसा ध्यायन्दक्षिणा प्राचमृजुं दीर्घं सं २

तत्तं जुहोति दक्षिणं परिधिसंधिमन्वहृत्येंद्राय स्वाहेति प्रांचमुदंचमृजुमाघारमाघार्याज्य
भागौ जुहोत्यग्नये स्वाहेत्युत्तरार्धपूर्वार्धे सोमाय स्वाहेति दक्षिणार्धपूर्वार्धे तावंतरेणे
तरा जुहोति युक्तोवह जातवेदः पुरस्तादग्ने विधि कर्म क्रियमाणं यथेदं ॥ त्वं भिषग्भे
पा। षजस्यासि कर्ता त्वया गा अश्वान्पुरुषान्सनेमं स्वाहा ॥ या तिरश्ची निपद्यसेहं विधरणी इ २
ति ॥ तां त्वा घृतस्य धारयाग्नौ संराधनीं यजे स्वाहा ॥ संराधन्यै देव्यै स्वाहा ॥ प्रसा
धन्यै देव्यै स्वाहेति ॥ २ ॥ सर्वदर्विहोमाणामेष कल्पो मंत्रांते नित्यः स्वाहाकारो मंत्रास
मुष्मै स्वाहेति यथादेवतं भूर्भुवः स्वरिति व्याहृतिभिर्जुहोत्येकैकशः समस्ताभि
श्चायुर्दा अग्न इत्येषा ॥ आयुर्दा देव जरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने ॥ घृ
तं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमं स्वाहेमं मे वरुण तत्त्वायामि त्वन्नो अ
ग्ने स त्वन्नो अग्ने त्वमग्ने अयास्यया सन्मनसा हितः ॥ अयासन्हव्यमूहिषे या नो धेहि
भेषजं स्वाहा ॥ प्रजापत इत्येषा ॥ यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरं ॥ अग्निष्ट

हे॰सू॰ त्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे ॥ अग्नये स्विष्टकृते सुहुतहुते सर्वहुतआ
२ हुतीनां कामानां समर्धयित्रे स्वाहेत्युत्तरार्धपूर्वार्धे संसक्तामिश्रराभिराहुति
भिर्जुहोत्यथैके जयाभ्यातानान्राष्ट्रभृत इत्युपजुह्वति पुरस्तात्स्विष्टकृतश्चित्तं च स्वाहा चि
त्तिश्च स्वाहेति जयान्जुहोति चित्ताय स्वाहा चित्तये स्वाहेति वाग्निर्भूतानामधिपतिः स अ
मावत्वित्यभ्यातानानस्मिन्ब्रह्मन्नस्मिन्क्षत्र इत्यभ्यातानेष्वनुषजति पितरः पितामहा
इति प्राचीनावीती जुहोत्युपतिष्ठतेवर्त्तापाद्र तथामेतिराष्ट्रभृतः पर्यायमनुद्रुत्य तस्मै
स्वाहेति पूर्वामाहुतिं जुहोति ताभ्यः स्वाहेत्युत्तराग्रेणोत्तरं परिधिसंधिमश्मानं निधा
य दक्षिणेन पादेन ॥ कुमारमास्थापयत्यातिष्ठममश्मेव त्वं स्थिरो भव ॥ प्रमृणीहि राम
दुरस्यून्त्सहस्व पृतनायतेऽइत्यथैनमहतं वासः परिधापयति पूर्वं निधाययाऽअकृन्तन्न
वयन्याऽअतन्वत याश्च देवीरन्तानभितो ददन्त ॥ तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्मानिदं २

परियस्स्ववासः ॥ परिधत्त धत्त वाससैनं शतायुषं कृणुत दीर्घमायुः ॥ बृहस्पतिः प्रायछ
द्वास एतत्सोमाय राज्ञे परिधातवा उ ॥ जरां गछासि परिधत्स्व वासो भवा कृष्टीनामभिश
स्तिपावा ॥ शतं च जीव शरदः सुवर्चा रायश्च पोषमुपसंव्ययस्वेति परिधाप्याभिमंत्रय य
ते ॥ परीदं वासो अधिधा स्वस्तये भूरापीनामभिशस्तिपावा ॥ शतं जीव शरदः पुरू
चीर्वसूनि चार्य्यो विभजासि जीवन्निति यथैनं मेखलया नाभिदेशे त्रिः प्रदक्षिणं परि
व्ययतीति हरिस्त्वेके ॥ याद्दुरिता परिबाधमाना शर्म वरूथे पुनती न आगात् ॥ प्राणापा
नाभ्यां बलमावहन्ती स्वसा देवानां सुभगा मेखलेयमिति उत्तरतो नाभेस्त्रिवृतं ग्रंथिं
कृत्वा दक्षिणतो नाभेः परिकर्षत्यथास्मा अजिनमुत्तरीयं करोति मित्रस्य चक्षुर्धरुणं
वरीयस्तेजो यशस्वि स्थविरं समिद्धं ॥ अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजि

नंयत्स्त्वासावदितिस्त्रिकक्षांवध्नातुवेदस्यानुवक्त्वेमेधायैश्रद्धायाअनुक्तस्यानिराकरणायब्र
ह्मणेब्रह्मवर्चसायेति कृष्णाजिनंब्राह्मणस्योत्तरं रौरवं राज न्यस्य वस्ताजिनं वैश्यस्याथैनंप
रिददातिपरीममिंद्रब्रह्मणेमहेश्रोत्रायदध्मस्यथैनंजरिमाणयेज्योक्छ्रोत्रेधिजागर अ
दितिब्राह्मणंपरीममिंद्रब्रह्मणेमहेराष्ट्रायदध्मस्यथैनंजरिमाणयेज्योकूराष्ट्रेधिजागर
दितिराजन्यंपरीममिंद्रब्रह्मणेमहेपोषायदध्मस्यथैनंजरिमाणयेज्योकूपोषेधिजागर अ
दितिवैश्यंनमपरेणाग्निमुदंचमुपवेश्यकृत्तोधेषणंप्राशयतित्वयिमेधांत्वयिप्रजामि
तिसैतैःसंन्नतैःपृषदाज्यमेकेप्राशयंतियोगेयोगेतवस्तरमितिमगनआयुष्येवर्चसेदृ
द्वाभ्यां धीतीप्राश्नंतंःसमीक्षतेप्राशयत्येकआचांतमुपस्पर्शयित्वाभिमंत्रयते शतमिन्नु
शरदोअंतिदेवायत्रानश्चक्राजरसंतनूनां।।पुत्रासोयत्रपितरोभवंतिमानोमध्या
रीरिषतायुर्गंतोरिति।।५।।इतिहिरण्यकेशीसूत्रेएकोनत्रिंशतिप्रश्नेप्रथमःपटलः।।१।। ५

आगंत्रासमगन्महिप्रसमृत्युं युयोतनन॥अरिष्टाः संचरेमहिस्वस्तिचरतादिहस्वस्याग्रहेभ्य
इतिप्रदक्षिणमग्निं परिक्रामंतमभिमंत्रयतेयेनमभिव्याहारयति ब्रह्मचर्यमागामुपमा
नयस्वब्रह्मचारीभवानिदेवेनसवित्राप्रसूतइतितंपृच्छतिकोनामासीत्यसावित्याच
ष्टेयथानामाभवतिस्वाऽस्तिदेवसवितरहमनेनामुनोहंचमशीयेतिनामनीगृह्णाति
शन्नोदेवीरभिष्टयआपोभवंतुपीये॥शंयोरभिस्रवंतुनइतिमार्जयतेथास्यदक्षि
णेनहस्तेनदक्षिणमग्निंसमन्वारभ्यसव्येनसव्यव्याहृतिभिःसावित्र्येतिदक्षिणबा
(हुमभ्यामंनुपनयतेदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामुपनयेसा
वितिचाथास्यदक्षिणेनहस्तेनदक्षिणंहस्तंसांगुष्ठंगृह्णात्यग्निष्टेहस्तमग्रभीत्सोमस्
ती स्तेहस्तमग्रभीदृस्स्मास्तेहस्तमग्रभीत्त्वष्टास्तेहस्तमग्रभीत्पूषास्तेहस्तमग्रभीद्विष्णुस्ते
स्तेहस्तमग्रभीद्मित्रस्तेहस्तमग्रभीदर्यमा [illegible] नास्त्वाभिरक्षतु [illegible]
धर्मणाग्निराचार्य [illegible]

हि॰ स्र॰ ह्रुणस्तेहस्तमग्रभीत्त्वष्टातेहस्तमग्रभीद्धातातेहस्तमग्रभीद्विष्णुस्तेहस्तमग्रभीत्प्र
५ जापतिस्तेहस्तमग्रभीदितिसविताल्वाभिरक्षतुमित्रस्त्वमसिधर्मणाग्निराचार्यस्तवदे
वेनसवित्राप्रसूतोबृहस्पतेर्ब्रह्मचारीभवासावपोशानःसमिधमाधेहिकर्मकुरुमादि
वास्वाप्सीरित्येनꣳसꣳशास्यथास्यदक्षिणेनहस्तेनदक्षिणमꣳसमुपर्युपर्यन्ववमृश्य
हृदयदेशमभिमृशतिममहृदयेहृदयंतेअस्तुममचित्तंचित्तेनान्वेहिममवाचमेकमनाजु
ष्टस्वबृहस्पतिस्त्वानियुनक्तुमह्यंमामेवानुसꣳरभस्वमयिचित्तानिसंतुतेमयिसामीच्य
मस्तुतेमह्यंवाचंनियच्छतादितिप्राणानांग्रंथिरसिसमाविस्रसइतिनाभिदेशंभूर्भुवः
स्वःसुप्रजाःप्रजयाभूयासꣳसुवीरोवीरैःसुवर्चावर्चसासुपोषःपोषैःसुमेधामेध
यासुब्रह्माब्रह्मचारिभिरित्येनमंत्र्यभूरृक्षुत्वाग्नौपृथिव्यांवाचिब्रह्मणिददेसौभुवो
यजुःषुत्वावायावंतरिक्षेप्राणेब्रह्मणिददेसौस्वःसामसुत्वासूर्येदिविचक्षुषिब्रह्मणिददेसावि राम
त्यस्तेप्रियोसान्यसावन्नस्यतेप्रियोसान्यसौविरूढस्यावःप्राणआयुषिवस्यावःप्राणआयु ५

षिवसाविति चाथास्य दक्षिणेन हस्तेन दक्षिणं हस्तं सांगुष्ठं गृह्णात्यग्निरायुष्मानिति पंचभिः पर्या
येरायुष्टेनिश्चलो दधादिति ॥५॥ दक्षिणे कर्णे जपत्यायुर्दा अग्न इत्युत्तरे ऽग्नौ पृथिव्यां प्रतितिष्ठ वा
य्वावंतरिक्षे सूर्ये दिवियां स्वस्तिमग्निर्वायुरादित्यश्चंद्रमा आपोनुसंचरंति तां स्वस्तिमनुसं
चरासौ प्राणस्य ब्रह्मचार्यभूरसाविस्युभयत्रानुषजति मेधां मह्यमिन्द्रो ददातु मेधां देवी सरस्वती ॥
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजाविति तस्य मुखे न मुखं संनिधाय जपस्य थैनं प
रिददाति कशाकाय त्वा परिददाम्यघोराय त्वा परिददामि गदाय त्वा परिददामि यमाय त्वा परिद
दामि मखाय त्वा परिददामि वशिन्यै परिददामि पृथिव्यै त्वा सवैश्वानराय परिददाम्यद्भ्यस्त्वा प
रिददाम्योषधीभ्यस्त्वा परिददामि वनस्पतिभ्यस्त्वा परिददामि द्यावापृथिवीभ्यां त्वा परिददा
मि सुभूताय त्वा परिददामि सुभूताय त्वा परिददामि ब्रह्मवर्चसाय त्वा परिददामि विश्वेभ्यस्त्वा
देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वाभ्यस्त्वा देवेभ्यः परिददामीत्यत्र सावित्रीं
वाचयतीति यद्यपि पुरस्तादुपेतो भवति यद्यनुपेतस्त्पहेय पर्यवेतस धः पोष्करसादिरपरेणाग्निमुदगग्र
कूर्चं निधाय तस्मिन्प्राङ्मुख उपविशत्ति राष्ट्रं स्यादस्याचार्या संदीमात्वघोषमित्यादित्यायां जलिं कु

हि॰ स्॰

६

त्वाचार्ययोपसंगृह्य दक्षिणतः कुमार उपविश्याधीहि भो इत्युक्त्वाथाह सावित्रीं भो अनुब्रूहीति गणानां
त्वा गणपतिं हवामहे इत्येनमभिमंत्र्याथास्मै पच्छोऽग्नेऽन्वाहाथार्धर्चशोथ संततां म्ने स्तत्सवितुर्व
रेण्यं॥ भुवो भर्गो देवस्य धीमहि॥ स्वः धियो यो नः प्रचोदयात्॥ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भ
र्गो देवस्य धीमहि॥ स्वः धियो यो नः प्रचोदयात्॥ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदया[illegible]दिति॥ ६॥ अथ सप्त पालाशीः समिध आर्द्रा अप्रछिन्ना
ग्राः प्रादेशमात्रीर्घृतान्वक्त्वाऽभ्याधापयेत्। अग्नये समिधमाहार्षं बृहते जातवेदसे॥ यथा त्वम
ग्ने समिधा समिध्यस एवं मां मेधया प्रज्ञया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहे
तिकाम अग्नये समिधावितिहे अग्नये समिधः इति च तस्त्रोथ परिषिंचति यथा पुरस्तादन्वमं
स्थाः प्रासावीरिति मंत्रांनान्तसन्नमत्स्विथ देवताउयति स्यलेग्ने व्रतपते व्रतं चरिष्यामीत्यग्निं वो
याव्रतपत इति वायुमादित्यव्रतपत इत्यादित्यव्रतानां व्रतपत इति व्रतपतिमन्त्रगुरवेवरं द
त्वायुदायुषे सुश्राव्यस्सूर्येषिने पुत्रस्तं ते परिददामीति परिददायतच्चक्षुर्देवहितं पुरस्ताच्छु
क्रमुच्चरत्॥ पश्येम शरदः शतं जीवेम शरदः शतं नंदाम शरदः शतं मोदाम शरदः शतं ६

भवामशरदश्शतꣳश्रृणुवामशरदः शतंप्रब्रवामशरदः शतमजीताः स्यामशरदः शतंज्योक्च सूर्यं दृश
इत्यादित्यमुपतिष्ठतेऽग्निष्ट आयुः प्रतरां कृणोत्वग्निष्टे पुष्टिं प्रतरां दधात्विन्द्रो मरुद्भिरिह ते दधा
दित्यस्तेवसुभिरादधात्विति दंडं प्रदायामंत्रं प्रयच्छत्यथाहस्मिक्षाचर्यं चरेति समातरमेवाग्रे भि
क्षेतान्येषु राति कुलेषु हृस्यभैक्ष्यमिति प्राह यस्यतेप्रथमवास्यꣳहराम स्तत्वा विश्वे अवंतु देवाः॥
तं त्वा भ्रातरः सुवृधो वर्धमानमनुजायंतां बहवः सुजातमिति प्रथमवास्यमस्यादत्त उपस्थि
ते न्नओदनस्याप्रूयानाꣳसक्तूनामिति समवदायसर्पिर्मिश्रस्य जुहोत्यग्नये स्वाहा सोमाय
स्वाहाग्नये न्नादाय स्वाहाग्नयेन्नपतये स्वाहा विश्वेभ्यो देवेभ्यस्वाहा सर्वाभ्यो देवताभ्यः स्वा
हाग्नये स्विष्टकृते स्वाहेति सर्वत्रैवमन्नादिष्टदेवतेषु मे स्वाहेति यथादेवतमादिष्टदेवतए
पु तिषांमेवान्नानाꣳसमवदाय प्रागग्रेषु दर्भेषु बलिं करोति वास्तुपतये स्वाहेतित्रिरत्नान्ब्राह्मणा न
...नूपरिविष्य पुण्याहꣳस्वस्त्ययनमृद्धिमिति वाचयित्वा ॥७॥ अथ व्रतं चरत्यक्षारमलव
णमश्नी... धान्यं भुंजानो धः शायी मन्मेयपाय्य श...ब्रह्मचर्यम धुमाꣳसास्थादिवास्वाप्यु भो

हि·सू

७

कालेोभिक्षाचर्यमुदकुंभमित्याहरन्नहरहः काष्ठकलापमुभौ कालौ सायं सायं वासमिधोभ्यादधातिपुरस्तात्परि

षेचनाद्यथाहृतद्दूसदोगोर्यमितिप्रदक्षिणमग्निं परिमृज्य परिषिंचतियथापुरस्तात्स्याहृतिभिः समिधोभ्यादधात्यस्येकेक

त्राः समस्ताभिश्चैषा तेअग्नेसमित्तयावर्धस्वचाचप्यायस्व। वर्धि। षीमहिचवयमाचप्यासिषीमहिस्वाहा। मेधांमइं

द्रोददातुमेधांदेवीसरस्वती। मेधांमेअश्विनावुभावाधत्तांपुष्करस्रजौस्वाहा। अप्सरासुचयामेधागंधर्वेषुचयंन्मनः।

देवीमेधामनुष्यजासामांमेधासुरभिर्जुषतां स्वाहा। आमांमेधासुरभिर्विश्वरूपाहिरण्यवर्णाजगतीजगम्या। ऊ

र्जस्वतीपयसापिन्वमानासामांमेधासुप्रतीकाजुषतां स्वाहेतितथैवपरिमृज्यपरिषिंचतियथापुरस्ताद्यत्तेअग्ने

तेजइत्येतैर्मंत्रैरुपतिष्ठतेमयिमेधांमयिप्रजामितिचत्र्यहेपर्यवेतेतथैवत्रिवृतान्नेनब्राह्मणान्परिविष्यपुण्याहं

स्वस्त्ययनमित्याशिषोवाचयित्वा अतं विसृजतेअग्नेव्रतपतेव्रतमचारिषमित्येतैः सन्नतैरेषत्रिरात्रएबालऊर्ध्वमाचा

र्यकुलेवास्यश्नातिक्षारंलवणं ग्रामीधान्यमितिदंडजिनमेखलाश्रियानिटेवास्यात्काषायमजिनंवावसेतनाग्नि

यमुपेक्षितस्याचत्वारि शाहत्वाणिचतुर्विं शतिर्द्वादशावद्ग्रहणंवानवेवा व्रतः स्यात्कांडोपाकरणेकांडविसर्गेचस

दसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं। सनिंमेधामयासिषं स्वाहेतिकांडर्षिंद्वितीयइमंमेवरुणतत्त्वायामिकृत्वन्नोअ। १२शे

ग्नसत्वन्नोअग्नेत्वमग्नेअयासिप्रजापतेयदस्यकर्मणोत्यरीरिचमितिचात्रैकेजयाभ्यातानान्राष्ट्रभृतइत्येकपञ्जु

७

त्ति यथापुरस्तात् ॥८॥ इति हिरण्यकेशीसूत्रे एकोनविंशे प्रश्ने द्वितीयः पटलः ॥२॥
अधीत्य वेदं स्नास्यन्नवस्थायां स्यामः उदगयन आपूर्यमाणपक्षे रोहिण्यां मृगशिरसि ति
ष्य उत्तरयोः फल्गुन्योर्हस्ते चित्रायां विशाखयोर्वा तेषु स्नायाद्यत्रापस्तद्गत्वाग्निमुपस
माधाय व्याहृतिपर्यन्तं कृत्वा पालाशीं समिधमादधातीमं स्तोममर्हते जातवेदसे रथमिव
संमहेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव स्वाहेत्य व्याहृ
तिभिर्जुहोतीति यथापुरस्तादायुष्यं यद्देवानामायुष्यं तन्मे अस्त्वायुष्यं स्वाहेतीमं मे वरुण
तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि प्रजापते यदस्य कर्मणोऽत्यरीरिचमिति
चात्रैके जयाभ्यातानान् राष्ट्रभृत इत्युपजुहोतीति यथापुरस्ताद्ब्राह्मणानन्नेन परिविष्य पुण्याहं
स्वस्त्ययनमृद्धिमिति वाचयित्वा व्रतं विसृजतेऽग्ने व्रतपते व्रतमचारिषमित्येतेन व्रतं विसृज्योदु
त्यं चित्रमिति द्वाभ्यामादित्यमुपतिष्ठत उदुत्तमं वरुण पाशमित्युत्तरीयं ब्रह्मचारिवासो नि
धायान्यत्परिधायावाधममित्युत्तरीयं विमध्यममिति मेखलां मथा वयमादित्य व्रत इति दं

हि·स
८

मेखलांदंडंकृष्णाजिनंचाप्रपद्येश्यापरेणाग्निंप्राङ्मुखउपविश्यक्षुरंसंमृशतिक्षुरोनामासि
स्वधितिस्तेपितानमस्तेअस्तुमामाहिंसीरितिचश्रेप्रदायोदयनीयाआपोभिस्यन्तिशि
वानोभवथसंस्पृश्यइत्यापउंदंतुजीवसइतिदक्षिणंगोदानमुनत्त्याषधेत्रायस्वेनमिस्
ध्वाग्नामोषधिमंतर्दधातिस्वधितेमैनंहिंसीरितिक्षुरेणाभिनिदधातिदेवश्रूरेतानि
प्रवपइतिप्रवपइतियत्क्षुरेणमर्च[illegible]यतासुपेशसाचसर्वपासिकेशश्मश्रुवर्चयमुखं
मानआयुःप्रमोषीरितिचप्रारंसमीक्षतेश्मश्रूण्यग्रेवापयतेथोपपक्षावथकेशा
नथलोमान्यथनखान्यानडुहेशकृत्पिंडेसंयम्यकेशश्मश्रुलोमनखानीदमहममुष्या
मुष्यायणस्यपाप्मानमपगूहामीतिगोष्ठउदुंबरेदर्भस्तंबेवानिखनतियोऽस्यरात्रिर्भ
वतिस्नापयनीयेनाप्लाव्योदुंबरेणदंतान्प्रक्षाल्यधत्ते॥१॥अन्नाद्यायव्यूहध्वंदीर्घायुत्वा
यव्यूहध्वंब्रह्मवर्चसायव्यूहध्वंदीर्घायुरहमन्नादोब्रह्मवर्चसीभूयासमित्यथोष्णशीता
भिरद्भिःस्नापयत्यापोहिष्ठामयोभुवइतितिसृभिर्हिरण्यवर्णाःशुचयःपावकाइतिचत ८

स्तभिः पवमानः स्कंर्जनद्गतिचेलेनानुवाकेन गोष्ठेवाव छ्रायसं परिश्रित्य पुरोदयमाद्दि
त्यस्य प्रविशत्यत्र सर्वं क्रियते नेनमे तदद्दराद्दित्यो भितपती त्येके षां स्नाता नां वा एष तेजसा
तपति य एष तपति तस्मात्स्नातकस्य मुखं रेफायमली वाहरंत्यस्मेस र्वस्करभि चंदनं वा पिष्ट
तरभ्युस्य नमोग्नहाय चाभिग्नहाय च नमः शाकजंजभाभ्यान्नमस्ताभ्यो देवताभ्यो या अ
भिग्राहिणीरितिदेवेभ्यः प्राचीनमं जलिकृत्वा तेनानुलिंपेत प्सरा स्कयागंधोगंधर्वेषु च य
शराः दैव्यो योमानुषो गंधः स मामाविशतादिहे त्याहरंत्य [illegible] स्मा अहतेवा सस
ते अभ्युस्य सोमस्य तनूरसि तनुवं मे पाहि स्वा मा तनूराविशशिवा मा तनूराविशत्यं तरीयं वा
सः परिधायाप उपस्पृश्य तथोत्तरीयं परिधायाप उपस्पृश्याग्निं प्राङ्मुखउपविशत्याहरंत्यस्मै कुंडले चा द
न मणिं वा दरं वा स्कवर्णाभिच्छादनं तद्दुभयंदर्भेण प्रबध्यायुष्यं वर्चस्यं रायस्पोषमौद्भिदं हिरण्यमायुषे वर्चसे जैत्र्यायाविशतां मां स्वाहा ॥ उच्चैर्वाजि पृ
तनासाहं सभासाहं धनंजयं सर्वाः समग्रा ऋद्धयो हिरण्यस्मिन्त्सममा हत्वा स्वाहा ॥ इति नमह हिरं

हि॰स्मा॰स॰ ण्यस्यपितुरिवनामाग्रभिषं॥तंमाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोतुस्वाहा॥प्रियं
माकुरुदेवेषुप्रियंमा ब्रह्मणस्कुरु॥प्रियंविश्येषुशूद्रेषुप्रियंमाकुरुराजसुस्वाहा॥इयमोषधेत्रा
यमाणासहमानासहस्वती॥सामाहिरण्यवर्चसंकरोतुपुरुषंप्रियंब्रह्मवर्चसिनंमाकरोतुस्वाहेत्येतैरे
वपंचभिस्स्वाहाकारैस्त्रिप्रक्षिप्यमुदपात्रेणपरिप्लाव्य॥ ॥विराजंचस्वराजंचाभिष्टीयाचनोगृहे॥
लक्ष्मीराष्ट्रस्ययामुखेतयामासंसृजामसीतिकुंडलेप्रतिहरतेदक्षिणेकर्णेदक्षिणंसव्येनसव्ये
मृत्युभिष्ठालेवैरायुषेवर्चसेसंवत्सरस्मधायसातेवसंननुगृह्णासीतिकुंडलेसंगृह्णातइयमोषधे
त्रायमाणासहमानासहस्वती॥सामाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोत्वपा
शोसीतिस्रीवायोमणिंप्रतिमुंचतेशुभिकेशिरसधायेकामायास्ये॥इमांतांप्रतिमुंचेहंभगेनसहवर्चसे
तिद्वाभ्यांस्रजंप्रतिमुंचते॥यदांजनंत्रैककुदंजातंहिमवतउपरि॥तेनवामांजेहंभगेनसहवर्चसा १३
मयिपर्वतपूरुषमितित्रैककुदेनांजनेनांक्तेनास्मिन्नविद्यमानेयेनकेनचिदन्येनमनःपरागतोमस्या
दर्शवेक्षतेदेवस्यत्वेतिवेयावंदंडंप्रगृह्यइस्यवन्त्रोस्यशिवेनोमापाहीतित्रिरूर्ध्वमुन्मार्ष्टिवेणवेजयास्म

नृभा

द्विषतस्तस्कराः न्सरीस्त्यर्थां पदान्नृक्षाः सिपिशाचान्यो रूपेयाऽङ्गया न्नो दंडरक्षा विश्वस्माङ्गयाद्रक्षसर्वतो
जहितस्कराननग्नः सर्वेवृक्षेषु जायसे त्वं सपत्नहा ॥ जहि शत्रुगणान्सर्वान्त्सम मे तं मघवा निवृत्तिः प्रद
क्षिणमुपर्युपरिशिरः प्रालिहरते प्रतिष्ठस्यो देवतेमामा संततममिस्तु यानहा वध्यवरो हातेप्रजापतेः शरणम
५७ सित्रह्मणो दिरिति छत्रं प्रतिगृह्णाति यो मे दंडः परापद्विहायसो ऽधिभूम्यां ॥ इमं तं पुनरादद्देयमायुषे च
बलाय चेति दंडं पुनरादत्ते यद्यस्य हस्तात्स्वतति ॥ ३ ॥ इति हिरण्यकेशीसूत्रे एकोनविंशतिप्रश्ने तृतीय
रथमश्वं पटलः ॥ ४ ॥ आनयंत्यसि हस्तिनं वा रथंतरमसि वामदेव्यमसि बृहदस्यं को न्यं काव भितद्वयेषा ॥ अयं वा
मश्विना रथो मा दुःखेमा स्वेभिषत्वा अरिष्टः स्वस्तिगच्छतु विविघ्नन्नभिदासतः ॥ इह धृतिरिह वि
धृतिरिह रम इह रमतामिति रथमातिष्ठंते यदि रथेन प्रविशः त्युभ्यो सिहस्यो सि मयोसी त्येकादशभिर
श्वनामभिरश्वं यद्यश्वे नेंद्रस्य त्वा वज्रेणाभ्युपविशामि वहकालवहश्रियमाभिवह हस्त्यसि हस्तियश
समसि हस्तिवर्चसमसि हस्तियशसि हस्तिवर्चसी भूयासमिति हस्तिनं यदि तेन तत्र गच्छेयत्र
स्मा अपचितिं करिष्यंतो भवंति सर्वं त्वं दुदिशोमायिसमागच्छंतु सूनृताः ॥ सर्वे कामा अभियंतु नः

हि॰ सू॰ ।। प्रिया अभिरूपं नुनः ।प्रिया इति हिरा उपनिश्चितेयशोसि यशोहं त्वयि भूयासमिति योस्यापचितिं करिष्यन्भवति
तमभ्यागच्छन्समीक्षतेथास्मा आवसथं कल्पयित्वार्घं इति प्राह कुरुतेति प्रत्याह कुर्वन्त्यस्मै त्रिवृतं पांक्तं वा
दधि मधु घृतमिति त्रिवृद्दधि मधु घृतमापः सक्तव इति पांक्तः कंसे दध्यानीय मध्वानयति द्वसीयस्यानी
।।१०।। यवर्ष्मपसापिधायानूचीनानि दृष्यगादापयति कूर्चं वाद्यमर्घ्यमाचमनीयं मधुपर्क इत्यन्वक्तुं संवृज्जिना
सोनुपोकिंचयाचाचे केकें प्राह कूर्च इति कूर्चे तस्मिन्प्राङ्मुख उपविश्य तिराङ्छभ्रदस्याचार्यां संदीमान्वघोष
मित्यथास्मै पाद्यमिति प्राह तेनास्य शूद्रः शूद्रा वा पादौ प्रक्षालयति सव्यमग्रे ब्राह्मणस्य दक्षिणमितरयोः
विराजो दोहोसि मयि दोहः पद्यायै विराज इति योस्य पादौ प्रक्षालयति तस्य हस्तावभिमृश्यात्मानं प्र
त्यभिमृशति मयि तेज इंद्रियं वीर्यमायुः कीर्तिर्वर्चो यशोबलमित्यथास्मा अर्घ्यमिति प्राह तत्प्रतिगृह्णात्या
मागन्यशसा संसृज तेजसा वर्चसा पयसा च । तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामिति समुद्रं
वः प्रहिणोम्यक्षिताः स्वां योनिमपिगच्छत । अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पय इति शेषं निनीयमानमनु
मंत्रयतेथास्मा आचमनीयमिति प्राह । अमृतोपस्तरणमसीत्यप आचम्याथास्मै मधुपर्क इति प्राह तं संसा
वित्रेणोभाभ्यां हस्ताभ्यां प्रतिगृह्य पृथिव्यास्त्वा नाभौ सादयामीडायाः पद इति पृथिव्यां प्रतिष्ठाप्य यन्मधुनो ।।१०।।
मधव्यं परमम न्नाद्यं रूपं तेनाहं मधुनो — रा

मधव्येन परमेण रूपेण परमो मधव्योऽन्नादो भूयासमिति संगुष्ठेनोपमध्यमया चांगुल्या त्रिः प्रदक्षिणं संयुत्य
तेजसे त्वा श्रियै यशसे बलायान्नाद्याय प्राश्नामीति त्रिः प्राश्य यो स्य रातिर्भवति तस्मा उच्छिष्टं प्रयच्छति सर्वं वा प्रा
श्यामृतापिधानमसीत्यप आचाम्यास्मै गौरिति प्राह तस्याः कर्मोत्सर्गो वा गौर्धेनुर्भव्या माता रुद्राणां
दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट
पिबतूदकं तृणान्यत्तु ओमुत्सृजतेत्युत्सर्गे सः आलिंगोरस्य पहतपाप्मा पाप्मानं जहि मम चामुष्य च
ति हतं मे द्विषंतं हतो मे द्विषन्कुरुतेत्यकर्मक्रियमाणायामुत्सर्गेन्धेनमांसेनान्नं संस्कृत्य स्थालीपाकेन भिर्नि आहुत
ह त्वं भक्षत्वा वरान्नेनान्नमाप्नायेत मे श्रीयतन्मऊर्जे धास्त स भक्षतामित्युक्त्वाथाहं ब्राह्मणान्भोजयतेति तेषु
स्मै भुक्तवत्सु अनु संवृजिनमन्नमाहारेति तत्प्रतिगृह्णाति द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु पृथिवी
तिद्दातु प्राणः प्रतिगृह्णातु प्राण स्त्वाश्नातु प्राणाः पिबन्त्विति ग्राग्नेमिवर्चः कृणुतामिति यावत्कामं प्रा
श्य यो स्य रातिर्भवति तस्मा उच्छिष्टं प्रयच्छति यं कामयेत नावच्छिद्येतेति यस्मिन्भूतं च भव्यं च सर्वे
लोका इह श्रिताः तेन त्वाहं प्रतिगृह्णामि त्वामहं ब्रह्मणा त्वा महां गृह्णाम्य सावित्या चेम्य ... भुक्त
वतो दक्षिणं हस्तं गृह्णीयाद्धेममास्यमंतेवासिनं प्रेष्यं वा कामयेत ध्रुवो मे न पापीयस्यादिति सपूर्वाह्णे

हि॰ सू॰ स्नातः प्रयतवस्त्रोऽहःक्षौ तो ब्राह्मणासंभाषो निशायां तस्यावसथं गत्वा जीवशृंगे प्रस्राव्य त्रिः प्रदक्षिणमाव
॥१३॥ सथं परिषिंचन्परिक्रामेत्परि त्वा गिरेर हमिदं परिभ्रातुः परिष्वस्कः परि सर्वेभ्यो ज्ञातिभ्यः परिषीदः
कुष्यसि ॥ शश्वत्परिकुपिलेन संक्रामेणाच्छिद्रोऽकुलेन परिमीढोऽसि परिमीढो स्थूलेन सुनिगु
से जीवशृंगं निदधाति यस्मा अमायाऽन्तेवासिनः प्रेष्या वोढुर्वेयुस्तान्परिक्रोशोद नुपोव्हदनुपेत्
यन्निवर्तीयोन्यवीरधः ॥ ऐन्द्रो वः परिक्रोशः परिक्रोशतु सर्वदा ॥ यद्दितिमामतिमन्यायेध्वं मायो
देवा अवत्तरं ॥ इन्द्रः पाशेन वः सिक्त्वा मह्यं पुनरुदाजतु ॥ इति योथस्यागारं प्रविश्य समिधकी सभि
अ धमादाया वर्त्तन वर्त्तयेस्या कर्षणेन जुहोति यो नो दारयुत्तिः स्थूलः हढा जारि चूर्णानि कारयित्वा स्त्र ला
तायेयानि मुपचपेदिङ्गयया स्य शिफमलिकमन्येभ्यः पुरुषेभ्योऽन्यत्र म दिस्यथातः पुण्यासि सिद्धिः प
य्यस्यापादयजुहोति ॥१४॥ यद्वो देवाः प्रपणं चरामः देवा धनेन धनमिच्छमानाः ॥ तस्मिन्त्वं सोम रुच
मादधात्वग्निरिन्द्रो बृहस्पतिरीशानश्च स्वाहेत्यथातः क्रोधविनयनं ॥ या त एषा ररापाता नूम न्यामु तनू
रास्यनाशिनी तां देवा ब्रह्मचारिणो विनयंतु सुमेधसः ॥ यत्त एनमुखे मतः रराटमुदिवा विध्यसि
अव ज्यामिव धन्विनो हृदो मन्युं तनोमि ते ॥ अहं द्यौश्च पृथिवी च चिपेक्रों नयाम सिगगर्मश्वन ॥१५॥

तर धौं

योह्वेति क्रूसमभिमंत्रयते॥ अथातः संवादमभिजयनं निशामंतुरागारेग्निमुपसमाधायव्याहृतिपर्यंतं कृत्वा
कृणैराज्यमिश्रैर्जुहोत्यवजिह्नं नाजिह्विकाव त्वा हविषायजे यथा हमुत्तरो वदासो वदा स्वाहेत्यथैनः संनि
धावभिजयस्यातेवाचमास्यो ददे मनस्यां हृदयादधि॥ अंगादंगात्सेवाचमाददे यत्रयत्र निहिता वा
क्तां त आददे रुद्र नीलशिखंड वीर कर्मणि कर्मणीमं मे प्रत्तिसंवादिनं वृक्षमिवाशनिना जहि॥
म्य अधो वदाधरो वदाधस्तादूस्यावद॥ अधो प्रतिरिव कूटेन निजस्य निहिता मया॥ तत्सस्यं यदहं ब्र
वीम्यधरो मत्यद्य स्वासां वित्ति हिरण्यबाहुः स्कभ गा जिलाक्ष्यलं कृ. तां मध्ये देवानामासीनार्थम
ह्यमवोचत्सहेति सभामालभ्य जयति मम परे सभा परे मम मे यं पृथिवी मही॥ ममाग्निश्चेंद्रश्च दिव्य
मर्थमसाधयन्निर्वतिपरिषदमभि वो क्ष्तेभ्ये वजपति॥ ५॥ इतिहिरण्यकेशीसूत्रे एकोन
विंशति प्रश्ने चतुर्थः पटलः॥ ४॥ दर्शे चंद्रमसं दृष्ट्वा पआचम्यापो धारयमाण आप्यायस्व सं
तेन वो नवो भवति जायमानो यमादित्या अंशुमाप्याययंतीति चतसृभिरुपतिष्ठते मयि दक्ष
क्रतू इति जंजभ्यमानो जपति सिगसि नसि वज्रो नमस्ते अस्तु मामाहिंसीरिति सिचा धिक्षि

पै

॥१२॥ होजपतिलस्य तंतुमाछिद्य सुरव वातेन प्रध्वं॰सयेत् ॥ येपक्षिणः पतयंति विभ्यतो निर्ऋतैः सहते
माशिवेन शग्मेन तेजसो दंतु वर्चसेति वयः॰सा धिक्षि होजपतिलं दृन्येन हस्ता स्वमज्यो
द्भिः प्रक्षालयीत दिवोनुमारहंतो अंतरिक्षाद पाः॰स्तो को अभ्य पतच्छिवाय समिंद्रियेणाम
नसा हमागां ब्रह्मणागुप्तः स्कन्नता स्कन्नेति जपेद्य द्येनमविज्ञातो पाः॰स्तोको भिच्छाद्येद्य
दि वृक्षाग्रादभ्यपतत् फलं यद्वांतरिक्षात्तदु वायुरेव ॥ यत्रा रक्षस्तनूर्वेयत्र ग्रासआपो बाध
तां निर्ऋतिं पराचैरिति जपेद्य द्येनमविज्ञातं फलमभिपतेन्नमः पथिषदे वा तेषवे रुद्राय नमो
रुद्राय पथिषद इति चतुष्पथमवक्रम्य जपति नमः पशुषदे वा तेषवे रुद्राय नमो रुद्राय प
शुषद इति शकृद्धृत्वा नमः सर्पसदे वा तेषवे रुद्राय नमो रुद्राय सर्पसद इति सर्पं दृष्ट्वा नमो
तरिक्षसदे वा तेषवे रुद्राय नमो रुद्रायांतरिक्षसद इति जपेद्य द्येनं ध्वंसं वर्तवात आगच्छेन्नमो
प्सुषदे वा तेषवे रुद्राय नमो रुद्रायाप्सुषद इति नदीमुत्तरन्तीमवगाह्य जपति नमस्तत्सदे वा
तेषवे रुद्राय नमो रुद्राय तत्सद इति चित्रं दृष्ट्वा देवयजनं वनस्पतिं वाक्रम्य जपति सूर्याभ्युदि ॥१२॥

तो हनिनाम्नीयाद्धाग्यतो हस्तिवे स्त्र्यो भिनिम्नुक्तो रात्रावेवं न यूपमुपस्पृशेद्यद्युपस्पृशेद्दुरिष्ट
यज्ञस्य प्रतिमुंचीत यद्येकमुपस्पृशेद् द्विषते वायो इति ब्रूयाद्यदि द्वावेतौ तेवा यू इति यदि ब
हूने तेते वायवद्वस्य निहृतं परिहृतं परिषुतं ऽ शकुनेरुदितं च यत्र मृगस्य लमक्ष्णा याति
द्विषद्भ्यो भया मसीत्यध्वानमभिप्रव्रजं जपत्युक्ते च शकुने सामगायसि ब्रह्मपुत्र इव स
वनेषु शंससि। स्वस्ति नः शकुने अस्तु शिवो नः सुमना भवेत्यनभिप्रेतं शकुनं प्रतिजपति यदेन
हूतान्यन्वा विश्य देवीं वाचं वदसि। द्विषतो नः परा वदतान्नर सो मर त्सवे न येत्य कस्त कमथास्मा
उभयत आ दीप्तमुल्मुकं तां दिशं प्रति निरस्यत्यग्ने अग्निना संवदस्व मृत्यो मृत्युना संवदस्व
त्यप उपस्पृश्याथेनमुपतिष्ठते विभ्रदसि प्रवाहण इत्येतेनानुवाकेन॥ ४६ ॥ यदीषितो य
दिवास्वकामीषितये ड्को वदति वाचमेतां॥ ताभिद्राग्नी ब्रह्मणास विदानौ शिवो नो रात्रिं
कृणुतं गृहे षु। इति सालावृकं प्रसार्य सव्यं पादमिसव्यमक्षिनिंपपिंच॥ सिहकस्य च ना

हि: सू: ममदि तिशकुनिऽ हिरण्यपक्षः शकुनिर्देवानांवसतिंगमः ॥ ग्रामंप्रदक्षिणं कृत्वा स्वस्तिनो
१२ वद कौशिके तिपिंगलां पुनर्मामैत्विंद्रियं पुनरायुः पुनर्भगः ॥ पुनर्ब्राह्मणमैतु मा पुनर्द्रवि
णमैतु मेत्यथैतेधिष्ठियासोअग्नयो यथा स्थानं कल्पंतामिहैव स्वाहा ॥ पुनर्मआत्मा पुन
रायुरागात्पुनः प्राणः पुनराकूतमागात् ॥ वैश्वानरोरश्मिभिर्वावृधानोंतस्तिष्ठतु मे मनो अमृ
तस्य केतु स्वाहा ॥ यदन्नमद्यते सायं न तस्प्रातरवतिक्षुधः ॥ सर्वं तदस्मान्मा हिंऽनेहितद्विवा सी
स दहशे दिव स्वाहैनमभिप्रेतःस्वस्तेदच्छाति तेराज्यमिश्रं जुहोत्यथैतान्यद्भुतप्रायश्चित्तानि भ
वंति कुसूलकपालड्या विस्तन्मध्वागारेरुपाविसद्द्रोर्गामधेपीस्थूणाव्यैरोक्षीद्वल्मीकउदे
सीदित्येवंरूपाणि सपूर्वाह्हेस्ना लः प्रयतवस्त्राहः क्षांतोब्राह्मणसंभाषोनरागारेऽग्निमुपस
माधाय व्याहृतिपर्यंतं कृत्वा जुहोतीमं मे वरुण तत्वायामित्वन्नोअग्ने सत्वन्नोअग्ने त्वमग्ने १२

अयासिप्रजापतेयदस्य कर्मणोत्यरीरिचमिति चान्तेकेजयाभ्याता न्नाष्ट्रभृत इत्युपजुहोति य
थापुरस्ताद्ब्राह्मणानन्नेनपरिविष्यपुण्याहꣳस्वस्त्ययनमृद्धिमिति वाचयित्वा॥ १७॥ इन्द्राग्नी
वःप्रस्थापयतामश्विनावभिरक्षतां॥ बृहस्पतिर्वोगोपालःपूषावःपुनरुद्रजत्विति गाःप्रति
ष्ठमानाअनुमन्त्रयतेपूषागा अन्वेतुन इति चेमायागाव आगमयन्त्वयक्ष्मा बहुसूवरीः॥ न
द्युलास्यमामाघोद्धवंमाहंभवावतीश्यंभ्योपीरितिसꣳस्थितोऊर्जोवःपश्याम्यूर्जोमापश्य
तेतिगोष्ठगताःसहस्रपोषंवःपुण्यासमितिचातोगवांमध्येग्निमुपसमाधायव्याहृतिपर्यन्त
कृत्वा पयसा जुहोत्युद्दीप्यस्वजातवेदोपघ्नंनिर्ऋतिंमम॥ पशूꣳश्चमह्यमावहजीवनं चदि
शोदिशस्वाहा॥ मानोहिꣳसीज्जातवेदोगामश्वंपुरुषंजगत्॥ अबिभ्रदग्नआगहिश्रि
यामापरिपातयस्वाहा॥ अयाग्निरिदंन्ययने ... नमस्ते ... हरसेशो

॥हि॰सू॰॥ विषइतिचेमंमेव रुणलत्वायाः सित्वन्नोअग्नेसत्वन्नोअग्नेत्वमग्नेअयासिप्रजापतेयदस्यकर्म
॥२६॥ णोत्यरीरिचमितिचात्रेकेजयाभ्यातानान्राष्ट्रभृतइपजुहोतियथापुरस्तात्॥१८॥इतिहिरण्य
केशीसूत्रेएकोनविंशतिप्रश्नेपंचमःपटलः॥५॥समावृत्तआचार्यकुलान्मातापितरोबि
भृयात्ताभ्यामनुज्ञातोभार्यामुपयच्छेत्सजातान्नग्निकांब्रह्मचारिणीमसगोत्रामन्हः पंचसु
कालेषुप्रातःसंगवेमध्यंदिनेअपराह्णेसायंवेतेषुकालेषुयत्कारीस्यात्पुण्याहएवकुरुते
ग्निमुपसमाधायपरिधिपरिधानांतंकृत्वावधूमानीयमानां समीक्षतेसुमंगलीरियंव
धूरिमांसमेतपश्यत॥सौभाग्यमस्यैदत्त्वाथास्तंविपरेतनेतिदक्षि णतः पतिंभार्यां
पविश्यत्याचांतासमन्वारब्धायांपरिषिंचतियथापुरस्ताद्धाद्दातिपर्यंतंकृत्वाजुहोत्यग्निरैतु
प्रथमोदेवानां सोस्यैप्रजांमुंचतुमृत्युपाशात्॥तदयं राजावरुणोनुमन्यतांयथेयं स्त्री
पौत्रमघन्नरोदात्स्वाहा॥इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः॥अशून्यो
पस्थाज्जीवतामस्तुमातापौत्रमानंदमभिप्रबुध्यतामियं स्वाहा॥मातेगृहेनिशिघोषउत्था ॥२६॥

द्न्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज प्रजां पश्यंती सु
मनस्यमानां स्वाहा॥ द्यौस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयंतस्ते पुत्रान्सविताभिर
क्षतु॥ आवाससः परिधानाद्बृहस्पति विश्वेदेवा अभिरक्षंतु पश्चात्स्वाहा॥ अप्रजस्तां पौत्रमृ
त्युं पाप्मानमुत वाघं॥ शीर्ष्णस्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं स्वाहा॥ देवकृतं ब्राह्मणं क
ल्पमानं तेन हन्मि योनिषदः पिशाचान्॥ क्रव्यादो मृत्युनधरान्पादयामि दीर्घमायुस्तव जीवंतु पुत्रा
स्वाहे मं मे वरुण तत्त्वायामि त्वन्नो अग्ने सत्वन्नो अग्ने त्वमग्ने अयासि प्रजापतइ तिहुत्वाश्मानमा
स्थापयत्या तिष्ठेममश्मानमश्मेव त्वं स्थिरा भव प्रमृणी हि दुस्यून्त्सहस्व पृतनायतइत्यपरेणा
ग्निं दृषदान्दर्भान्पूर्वापरानुदगग्रान्संस्तीर्यते षु पूर्वापराववेतिष्ठेते॥ १९॥ प्राङ्मुखप्रत्यङ्मुख्या
हस्तं गृह्णीयात्प्रत्यङ्मुखः प्राङ्मुख्या वा यदि कामयेत पुंसो जनयेयमित्यंगुष्ठं गृह्णीयाद्यदि काम
येत स्त्रीरित्यंगुलीर्यदि कामयेतोभयं जनयेयमित्याभीवलोमान्यंगुष्ठं सहांगुलीभिर्गृह्णीते रख
न्तिप्रेदमिव रुक्भगो वाजिनीवन्ति॥ नोस्ता विश्व स्याभूतस्य प्रजायामस्य यतः॥ गृह्णामि ते सौभगत्वाय

॥हि०सू०॥ हस्तेमयापत्याजरदष्टिर्यथासत्॥भगोअर्यमासविता पुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥इतिनाम
ग्रेणदक्षिणमंसंअ...नीचीमभ्यात्मयाभिमंत्रयते॥अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुम
॥१८॥ नाःसुवर्चाः॥जीवसूर्देवृरस्सूस्योनाशंन्नएधिद्विपदेशंचतुष्पदे॥ताम्नःपूषंछिवतमामेरयस्वयस्यांबी
जंमनुष्यावपंति॥यानऊरूउशतीविस्रयातेयस्यामुशंतःप्रहरेमशेपं॥सोमःप्रथमोविविदेगंधर्वो
विविदउत्तरः॥तृतीयोग्निष्टेपतिस्तुरीयोहंमनुष्यजाः॥सोमोददद्गंधर्वायगंधर्वोग्नयेददात्॥पशू
ंश्चमह्यंपुत्रांश्चाग्निर्ददात्यथोत्वां॥अमूहमस्मिसात्वंद्यौरहंपृथिवीत्वंंसामाहमृक्त्वंतावेहि
संभवावसंहरेतोदधावहैपुंसेपुत्रायवेत्तवेरायस्पोषायसुप्रजास्त्वायसुवीर्यायेमांत्वमिंद्रमी
ढ्वःसुपुत्रांसुभगांकुरु॥दशास्यांपुत्रानाधेहिपतिमेकादशंकृधीतितांयथायतनमुपवेश्यास्या
स्याअंजलावाज्येनोपस्तीर्यलाजांह्विरावपतीमांलाजानावपामिसमृद्धिकरणान्ममतुभ्यंचसं
वननंतदग्निरनुमन्यतामयमितिस्त्रिघाचार्येयन्लाजुपक्रुतेम्नोलाजानावपंती॥दीर्घायुरस्तुमेपति सूत्र
रेधंतांज्ञातयोममस्वाहेतितस्याअंजलिनाजुहोत्युदायुषेत्युत्थाप्यविभाउतत्त्वयावयंधाराउदन्या ॥१८॥

इव॥ अतिगाहेमहि द्विषइति प्रदक्षिणमग्निं परिक्रम्य तथैव लाजानावपति द्वितीयं परिक्रम्य तथैव ला
जानावपति तृतीयं परिक्रम्य सोविष्टकृतं जुहोत्यत्रैके जयाभ्यातानान् राष्ट्रभृत इत्युपजुह्व
ति यथा पुरस्तात् तामपरेणाग्निं प्राचीमुदीचीं वा विष्णुक्रमान्क्रामयत्यथैनां संशास्ति दक्षि
णेन प्रक्रम्य सव्येनानुप्रक्रामेमा सव्येन दक्षिणमतिक्रामीरिति॥२०॥ एकमिषे विष्णुस्त्वान्वे य
तु द्वे ऊर्जे विष्णुस्त्वान्वेतु त्रीणि व्रताय विष्णुस्त्वान्वेतु चत्वारि मायोभवाय विष्णुस्त्वान्वेतु प
ञ्च पशुभ्यो विष्णुस्त्वान्वेतु षड्रायस्पोषाय विष्णुस्त्वान्वेतु सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा
न्वेत्विति सप्तमं पादमवस्थाप्य जपति सखा यो सप्तपदा वभूव सख्यं ते गमेयं सख्यात्ते
मायोषं सख्यान्मे मायोष्ठा इत्यथास्या दक्षिणेन पादेन दक्षिणं पादमवक्रम्य दक्षिणेन हस्ते
न दक्षिण[illegible]मंसमुपर्युपर्यन्ववमृश्य हृदयदेशमभिमृशति यथा पुरस्तात् प्राणानां ग्रन्थिर

हि॰सू॰ सिसमाविस्त्वस इति नाभिदेशं तामरेणाग्निं प्राचीमुपवेश्य पुरस्तात्प्रत्यङ् तिष्ठन्नद्भिः प्रोक्षत्यापो
हिष्ठामयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्ज
॥१८॥ न इति चैतेनानुवाकेनात्र बीजान्यधिश्रयंति ॥ २१ ॥ इति हिरण्यकेशीसूत्रे एकोनविंश
तिप्रश्ने षष्ठः पटलः ॥ ६ ॥ तां ततः प्रवाहयंति प्रवाहारयंति समोप्येलमग्निमनुहरंति नि
त्यो धार्यो नुगतो मंथ्यः श्रोत्रियागाराद्वाहार्योपवासश्चानुगते भार्यायाः पत्युर्वागारं
प्राप्यरथेनाऽऽसऽश्मास्ति दक्षिणं पादमग्रेतिहरदेहलींमाधिष्ठा इति पूर्वार्धेशालायां
मुष्योपसमादधात्यपरेणाग्निं रोहितमानडुहं चर्मप्राचीनग्रीवमुत्तरलोमास्तृणा
ति तस्मिन्प्राङ्मुखावुदङ्मुखौ वोपविशतः पश्चात्पतिंभार्या पवित्रा तौ इह गावो निषीदंति
हाश्वा इह पूरुषाः ॥ इहो सहस्रदक्षिणोऽपि पूषा निषीदत्विति याचंनियमौ चासाते आनक्ष ॥१८॥

त्राणामुदयादुदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य देवीः षडुर्वीरिति दिश उपतिष्ठते
माहास्महि प्रजयेति नक्षत्राणि मा रधाम द्विषते सोम राजन्निति चंद्रमसं सप्तर्षयः प्रथमां
कृत्तिकानामरुंधतीं ये ध्रुवतां ह निन्युः षट्कृत्तिका मुख्ययोगं वहंतीयमस्माकं भ्राजस्व
ष्टमीति सप्तर्षीनुपस्थाय ध्रुवमुपतिष्ठते ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवतस्स्थितं ॥ त्वन्न
क्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥ नमो ब्रह्मणे ध्रुवायाच्युतायास्तु नमो ब्रह्मणः पुत्रा
य प्रजापतये नमो ब्रह्मणः पुत्रेभ्यो देवेभ्यस्त्रयस्त्रिंशेभ्यो नमो ब्रह्मणः पुत्रपौत्रेभ्योऽङ्गिरो
भ्यो यस्त्वा ध्रुवमच्युतं सपुत्रं सपौत्रं ब्रह्म वेद ध्रुवा अस्मिन्पुत्राः पौत्रा भवंति प्रेष्यां तेवा
सिनो वसनकंबलानि कंसं हिरण्यं स्त्रियो राजानोन्नमभयमायुः कीर्तिर्वर्चो यशो बलं
ब्रह्मवर्चसमन्नाद्यमित्येतानि मयि सर्वाणि ध्रुवाण्यच्युतानि संतु ॥ २२ ॥ ध्रुवं त्वा ब्रह्म वेद
ध्रुवोहमस्मिंल्लोकेस्मिं जनपदे भूयासमच्युतं त्वा ब्रह्म वेदमाहमस्माल्लोकादस्माज्जनपदाच्चो

हि॰ सू॰ पितृष्वसुर्भ्रातृव्योऽस्मादस्माज्जनपदादवलाम चेष्टं त्वा ब्रह्म वेद मा हम स्माल्लोकादस्माज्ज
नपदाच्चेष्टि पितृष्वसुर्भ्रातृव्योऽस्माल्लोकादस्माज्जनपदाच्चेष्टलाम व्यथमानं त्वा ब्रह्म
१७ वेद मा हमस्माल्लोकादस्माज्जनपदाद्व्यथि पितृष्वसुर्भ्रातृव्योऽस्माल्लोकादस्माज्ज
नपदाद्व्यथतां नभ्यं त्वा सर्वस्य वेद नभ्यम हमस्य जनपदस्य भूयासं मध्यं त्वा सर्वस्य वे
द मध्यम हमस्य जनपदस्य भूयासं तलिं त्वा सर्वस्य वेद तलिर हमस्य जनपदस्य भूया
सं मेथीं त्वा सर्वस्य वेद मेथ्यम हमस्य जनपदस्य भूयासं नाभिं त्वा सर्वस्य नाभिर हम
स्य जनपदस्य भूयासं यथा नाभिः प्राणानां विष्टता नेव विष्टता नेकशांतपा- मानम
छतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मो भूयासं इमा मे कशनाम्पुण्यान्यागच्छन्तिस्वत्र मनो
सं सं भाध्यागारुपाध्याथेनामाग्नेयेन स्थालीपाकेन यजयति पल्यव हं निरूपयि त्वाभि
घार्यो द्वास्याग्नयं हुत्वाग्नये स्विष्टकृते जुहोतेन ब्राह्मणान्भोजयित्वा परिवेवा इष्टयोऽस्यापचितो १७
भवति तस्मात्कृष्ण भे दहन्ति नित्यमत ऊर्ध्वं पर्वस्वाग्नेयेन स्थालीपाकेन यजयति नित्यः सा

यंप्रात।व्रीहिभिर्यवैर्वाहस्तेनैतेआहुतीजुहोत्यग्नयेस्वाहाप्रजापतयेस्वाहेतिसोरींपूर्वीप्रातरंकेसमा
मनंतित्रिरात्रमक्षारालवणाशिनावधःशायिनावलंकुर्वाणोब्रह्मचारिणोवसतश्चतुर्थ्यामपर
रात्रेग्निमुपसमाधायप्रायश्चित्तपर्यंतंकृत्वानवप्रायश्चित्तीर्जुहोति॥२२॥अग्नेप्रायश्चित्ते
त्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैघोरातनूस्तामितोनाशयस्वाहा।
वायोप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैनिंदितातनूस्ता
मितोनाशयस्वाहा॥आदित्यप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामि
यास्यैपतिघ्नीतनूस्तामितोनाशयस्वाहा॥आदित्यप्रायश्चित्तेवायोप्रायश्चित्तेग्नेप्रायश्चित्ते
ग्नेप्रायश्चित्तेवायोप्रायश्चित्तेआदित्यप्रायश्चित्तइतिहुत्वाथास्यैमूर्ध्निसंस्रावंजुहोतिभ
र्गंत्वयिजुहोमिस्वाहा।स्कवायशस्त्वयिजुहोमिस्वाहा।स्कवाश्रियंत्वयिजुहोमिस्वाहा।स्क
वःस्कचःस्त्विषिंत्वयिजुहोमिस्वाहेत्यत्रेवोदपात्रंनिधायप्रदक्षिणमग्निंपरिक्रम्यापरेणा
ग्निंप्राचीमुदीचींवासंवेश्यथास्यैयोनिमभिमृशति।अभिमृशायंचशाखेनशिवेनाविशावल॥स
हस्तेणयशस्विनाहस्तेनाभिमृशामिसिक्तप्रजास्त्वायेत्यथैनामुपयच्छते।सनाम्नःसंहृदयामि

हि० गृ० संनाभिः संत्वचः॥ संत्वाकामस्ययोक्त्रेयुंजान्यविमोचनायस्यथेनांपरिष्वजते॥ मामनुव्रताभ
वसहचर्यामयाभव॥ यातेघ्नीपतिघ्नीजारघ्नीत्वेताकरोमिशिरःमह्यमेधिस्करपविजारेभ्यस्त्वथास्मै
॥१८॥ मुखेनमुखमीक्षते॥ मधुहेमधिदंमधुजिह्वामेमधुवादिनी॥ मुखेमेसारघंमधुदत्सुसंवननंकृतं
चक्रवाकंसंवननंयन्नदीभ्यउदाहृतं॥ यद्गन्धर्वोदेवगंधर्वस्तेनसंवननौस्वकद्इतित्रिरात्र
मलवद्वाससाब्राह्मणव्याख्यातानिव्रतानिचरतिचतुर्थ्यांस्नातामलंकृतांब्राह्मणसंभाषामाचक्ष्यै।
पह्वयते॥ ॥ विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु॥ आसिंचतुप्रजापतिर्धातागर्भंदधा
तुते॥ गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति॥ गर्भंतेअश्विनावुभावाधत्तांपुष्करस्रजौ॥ हिर
ण्ययीअरणीयंनिर्मंथतोअश्विना॥ तंतेगर्भंहवामहेदशमास्यायसूतवे॥ यथाग्निगर्भापृथि
वीद्यौर्यथेंद्रेणगर्भिणी॥ वायुर्यथादिशांगर्भएवंगर्भंदधामिते॥ यस्ययोनिंप्रतिरेतोगृहाणपुमा
न्पुत्रोजायतांगर्भोअंतः॥ तंमातादशमासोविभर्तुसजायतांवीरतमस्वानां॥ आतेगर्भोयोनिमे
तुपुमान्बाणइवेषुधिं॥ आवीरोअत्रजायतांपुत्रस्तेदशमास्यः॥ करोमितेप्राजापत्यमागर्भोयोनिमे ॥१८॥

तुते ॥ अनूनः पूर्णो जायतामनंधोश्लोणो पिशाचधीरः ॥ यानि प्रभूणि वीर्याण्यृषभा जनयन्तु नः ॥ तैस्त्वं गर्भिणी भव
सजायतां वीरतमस्स्वानां ॥ यो वशायां गर्भो यश्च वेहतीं इस्तं निदधे वनस्पतौ ॥ तेन त्वं गर्भिणी भव सा प्रसूर्धेनुगा भव ॥
सन्नाम्नश्चाक्रचाकमि लिचमूः प्रजापतिनास्यृषभेण स्कंद याभिवीरं घत्स्वासा विन्ति वीरं हे वज नयन्ति सर्वाण्युप
गमनानि मंत्रप्रवन्ति भवंतीत्यात्रेयो यश्चादो द्वन्द्वनी वितिबा द्वायपाः ॥ २ ॥ पाणिग्रहणा[illegible] दिरग्निस्तमोपा
सनमिसा चक्षते तस्मिन्गृह्याणि कर्माणि क्रियन्ते तस्योपासनेनाहिताग्नित्वं तथा पार्वणेन चरुणा दर्शपूर्ण
मासयाजित्वं चेति द्वादशाहं विच्छिन्नः पुनराधेयः प्रतिसंख्याय वा सर्वान्होमाञ्जुहुयात् परिश्रित उद्धृते
वास्तते सिकता उपोप्य उदुंबरशाखाभिः प्लक्षशाखाभिर्वा प्रच्छाद्य यथालाभं तूष्णीं संभारान्संभृत्य याज्ञि
कात्काष्ठादग्निं मथित्वा लौकिकं वाहृत्य स तेकृत्वा प्रज्वलयित्वाभ्यादधाति भूर्भुवः स्वरोमिति प्रतिष्ठाप्यथै
नमग्निमुपसमाधाय व्याहृति पर्यन्तं कृत्वा हेमिंदरकुलीउजुहोति यन्म आत्मनो मिंदाभूत्पुनरग्निश्चक्षु
रदादिति स्वस्त्ं तुमतीर्जुहोति तं तुं तन्वन्नुद्बुध्यस्वाग्ने त्वयस्त्रिं ॥ रात्तं तनवइति चतस्रोभ्यावर्तिनीर्जुहो
त्यग्नेभ्यावर्तिन्नग्ने अंगिरः पुनरूर्जा सह रय्येत्येकैकशो व्याहृतीः समस्ताश्च हुत्वायाश्चाग्नेस्यनभिश
स्तीश्च सत्यमित्वमया असि ॥ अयसा मनसा धृतो यसा हव्यमूहिषे या नो धेहि भेषजं स्वाहेत्येतामनस्वतीं प्रा
जापत्यां सप्तवतीं च हुत्वा दशहोतारं मनसानुद्रुत्य सम्भहं हुत्वा इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने सत्वन्नो अ

हि॰सू॰ ग्निसत्वन्नो अग्ने त्वमग्ने अयासि प्रजापते यदस्य कर्मणो सरीरिचमिति चात्रैके जयाभ्यातानाराष्ट्रभृ
॥१९॥ त इत्युपजुह्वति यथापुरस्ताद्ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयित्वा
प्रसिद्धमाग्नेयनस्थालीपाकेन यजेतेत्र गुरवे वरं दद्यान्निवाससी धेनुमनड्वाहं वा यदि प्रयायाद्या
ख्यातमात्मन्नरण्योर्वा समारोपणं समिधि वा समारोपयेदरणीकल्पेन खादिरः पालाशऔ
दुम्बरआश्वत्थश्चात्रैकतरस्मिन्मन्त्रावस्येतस्मिंश्छत्रियागारादग्निमाहृत्यानुद्धृत्य
स्वितिद्वाभ्यां यस्यां समारूढस्तामादधातिच्या २०॥ लोहोमकल्पो यदि पार्वणो विच्छिद्येत तस्मि
न्पाथिकेनेन याजयेद्यदि द्वौ वैश्वानरपाथिकृतौ यदि बहून्पुनराधेयो यदि नावशो विनाशो वान्ये
रग्निभिरग्नोसंसृष्टे वा पुनराधेयः॥ २६॥ इति हिरण्यकेशीसूत्रे एकोनत्रिंशत्प्रश्ने सप्तमः
पटलः॥ ७॥ शालाकाराशिष्यन्नुदगय आपूर्यमाणपक्षे रोहिण्यां त्रिषु चोत्तरेषु वाग्निमुपसमाधाय व्याहृ
तिपर्यन्तं कृत्वा जुहोतीमं मे वरुण तत्त्वा। यामि त्वन्नो अग्ने स त्वन्नो अग्ने त्वमग्नेऽअयासि प्रजापते यदस्य हेरंबू
कर्मणोऽत्यरीरिचमिति चात्रैके जयाभ्यातानान्राष्ट्रभृत इत्युपजुह्वति यथा पुरस्ताद्ब्राह्मणानन्नेन परिवि
॥१९॥

ष्यपुण्याहंस्वस्त्ययनमृद्धिमितिवाचयित्वाऽहतंवासःपरिधायापउपस्पृश्यदेवस्यत्वेत्यभ्रिमादायपरि
लिखितमितित्रिःप्रदक्षिणंपरिलिख्ययथार्थमवटान्खात्वाभ्यंतरपांसून्करोतीहैवध्रुवांनिमिनो
मिशालांक्षेमेतिष्ठतिघृतमुक्षमाणा। तांत्वाशालेसुवीराःसर्ववीराअरिष्टवीराअनुसंचरेमेतिदक्षि
णाद्वारस्थूणामुच्छ्रयतीहैवध्रुवाप्रतितिष्ठशालेअश्वावतीगोमतीसूनृतावती। ऊर्जस्वतीपयसा
पिन्वमानोच्छ्रयस्वमहतेसोभगायेत्युत्तरामात्वाकुमारस्तरुणआवत्सोजगतीसह। आत्वाहिरण्म
यःकुंभआदध्नःकलशैरयन्निवेतिसंमितावभिमृशत्येवमेवस्थूणाराजावुच्छ्रयस्येवमभिमृशत्यृते
नस्थूणावधिरोहवंशोर्ध्वाविराजन्नपसेधशत्रून्। अथास्मभ्यंसहवीरांरयिंदाइति१ध्रुवंशमा
रोपयतेमानःसपत्नःशरणःस्योनादेवोदेवेभिर्विमितास्यग्ने। तृणंवसानाःसुमनाअसित्वं
शान्नएधिद्विपदेशंचतुष्पदइतिछन्नावभिमृशतिनतोन्तःशाधेर्वास्तुशमनंनिशायामंत
रागारेग्निमुपसमाधायव्याहृतिपर्यंतंकृत्वाजुहोति।२७। वास्तोष्पतेवास्तोष्पतइतिद्वेवास्तोष्प
तेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो। अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व

हि॰स॰ स्वाहा॥ अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु॥ पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सचतां
नः शचीपतिः स्वाहा॥ परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा
॥२०॥ नः प्रजां रीरिषो मोत वीरान्स्वाहा॥ इदमू नु श्रेयो वसानमागन्म यद्गोजिद्धनजिदश्वजिद्यत्॥
पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सचतां नः शचीपतिः स्वाहेतीमं मे वरुण तत्त्वा यामि त्वं नो
अग्ने स त्वं नो अग्ने त्वमग्ने अयासि प्रजापते यदस्य कर्मणोऽत्यरीरिचमिति चात्रैके जयाभ्याताना
राष्ट्रभृत इत्युपजुह्वति यथापुरस्ताद्ब्राह्मणान्भोजनं परिदध्य विप्रपुण्याहं स्वस्त्ययनमृद्धिमिति वाच
यित्वैवं विहितं संवत्सरे संवत्सरे वास्तुशमनं मत्तावृत्ता वित्येके॥ २९॥ गृहा मा बिभीत मा
वेपिध्वमूर्जं बिभ्रत एमसि॥ ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ येषा
मध्येति प्रवसन्येषु सौमनसो बहुः॥ गृहानुपह्वयामहे ते नो जानन्तु जानतः॥ उपहूता इह गा वः
व उपहूता अजावयः॥ अथो अन्नस्य कीलाल उपहूतो गृहेषु नः॥ उपहूता भूरिसखाः सखायः स्वादु
संमुदः॥ अरिष्टाः सर्वपूरुषा गृहा नः सन्तु सर्वदा॥ ऊर्जस्वन्तः पयस्वन्त इरावन्तो हसामुदः॥ अनश्या अतृष्या॥ २०॥

हि०सू० गृहामास्म: इमां तनेतिगृहानभ्येतिक्षेमायवः शांत्यैप्रपद्ये शिवं शग्मं शंयोः शंयोरितिप्रविशतिनत्त
द्दहरागनः करुहंकरोमिगृहानहं सुमनसःप्रपद्येवीरघ्नावीरवतःसुशेवान् ॥ इरांवहंतःसुमनस्यमा
॥२१॥ नास्तेष्वहं सुमनाःसंविशामीतिसंविशतिविभ्वाउतत्वयावयंधाराउदन्याइव ॥ अतिगाहेमहिद्वि
पमीक्षते × षइतिभार्योंसमीक्षते ॥ २९ ॥ इतिहिरण्यकेशीसूत्रेएकोनविंशतिप्रश्नेअष्टमःपटलः ॥ ८ ॥ गृहामो
विमील ॥ चास्ताष्यने ॥ शालांकोरयिष्यन् ॥ पाणिग्रहणादि ॥ विष्णुर्योनिंकल्पयतु ॥ अग्नेप्रायश्चित्ते ॥
भुवंत्वाब्रह्मवेद ॥ तांततःप्रवाहयंति ॥ एकमिषे ॥ धाउमुखः ॥ समावृत्त ॥ इंद्राग्नीवःप्रस्थापयंतो ॥
यदीषितः ॥ दर्शेचंद्रमसं ॥ यद्वोदेवाः ॥ भुक्तवतः ॥ विराजोदोसि ॥ आनयंतस्मै ॥ विराजंचस्वराजंच ॥
अन्नाद्यायव्यूह्वं ॥ अधीत्यवेदं ॥ त्र्यहव्रतं ॥ अथसप्तपालाशीःसमिधः ॥ दक्षिणेकर्णेजपति ॥
आगंता ॥ कुमारमा ॥ स्थापयति ॥ सर्वदार्विहोमाणामेषकल्पः ॥ शम्याभिःपरिदधाति ॥ उ
पनयनं ॥ उपनयनमागंताधीत्यानयनंतस्मैदर्शेसमावृत्तस्तांततःप्रवाहयंतिशालांकारयिष्य हिरंसू॥
न्वस्ति ॥ ८ ॥ उपनयनंविराजंचेकमिषएकान्नत्रिंशत् ॥ २९ ॥ शाके १७६६ तारणनामसंवत्पोष
शुक्लपक्षेचतुर्थ्यांसमाप्तं ॥ रेचधरोपनाम्नाशिवरामेण लिखितं ॥ श्रीलक्ष्मीकेशवार्पणमस्तु ॥ ॥२०॥

हिर०
२१

॥ इति हिरण्यकेशीसूत्रे एकोनत्रिंशत्तिप्रश्नः ॥

अथ हिरण्यकेशी सूत्रे वि॰ ॰ शांतिप्रश्नः प्रारंभः ॥

॥ ॥ ॥ ॥ ॥ ॥ ॥

छ छ छ छ छ छ

॥हि० सू॥ श्रीगणेशाय नमः॥ हरिः ॐ॥ अथातः सीमंतोन्नयनं प्रथमगर्भायाश्चतुर्थे मास्यापूर्यमाणे
पक्षे पुण्ये नक्षत्रेऽग्निमुपसमाधाय व्याहृतिपर्यंतं कृत्वा धाता ददातु नो रयिमिति च तस्रो धात्री
॥१॥ जुहोतीमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयासि प्रजाप
तिमदस्य कर्मणो यदत्यरीरिचमिति चात्रैके जयाभ्यातानान्राष्ट्रभृतश्च जुहुतीति यथा पुरस्ता
द्ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयित्वा स्नातां प्रयतव
स्त्रामलंकृतां ब्राह्मणसंभाषामपरेणाग्निं मंडलाकारे प्राचीमुपवेश्य त्र्येण्या शलल्या श
लाटुग्लप्समुपसंगृह्य पुरस्तात्प्रत्यङ् तिष्ठन्व्याहृतिभी राकामहं यास्ते राके इति द्वाभ्यामूर्ध्वं सी
मंतमुन्नीयाऽभिमंत्रयते सोम एवं नो राजेत्याहुर्ब्राह्मणीः प्रजाभिरन्नचक्रा आसीनास्तीरे
तुभ्यं गंगे विश्वाउत त्वया वयं धारा उदन्या इव॥ अतिगाहेमहि द्विष इति॥१॥ अथातः पुं
सवनं तृतीये मास्यापूर्यमाणपक्षे पुण्ये नक्षत्रेऽग्निमुपसमाधाय व्याहृतिपर्यंतं कृत्वा ॥शिव॥
धाता ददातु नो रयिमिति च तस्रो धात्री जुहोती मं मे वरुण तत्त्वा यामि० वाचयित्वा स्ना
तामलंकृतां ब्राह्मणसंभाषामपरेणाग्निं मंडलाकारे प्राचीमुपवेश्य पृष्ठासीतितस्या दक्षि

णेषाणो यवमादध्यात्पुंस इत्यभितो यवं सर्षपौ धान्यमाषौ वाथ्याचारेत्त दधिद्रप्सं तदेनां प्राश
यस्याचांताया उदरमभिमृशति त्वष्टा हैं दशभिरभिमृशामि दशमास्याय सुतवा इति न्यग्रो
धशृंगं वा घृतेन कौशकारीं वा प्रैयुं गणवेण संयावेन यूपशकलं वोत्तरपूर्वस्याभिष्टेराग्नेवा
निर्मथ्यमूरूमलोपधानायेदक्षिणनासिकाछिद्रे प्रणयेद्यदि गर्भे स्त्रवेदार्द्रेणास्याः पाणि
नात्रिरूर्ध्वं नाभेरुन्मार्ष्टि पयांचं त्वानावींचं त्वष्टा वध्नातु बंधेन सकृत्तूनुपवेश्य दशमासो
अवीरहेति विजननकाले क्षिप्रंप्रसवनं शिरस्त उदकुंभं निधाय यत्तस्तूर्यंती मथास्या
उदरमभिमृशति॥२॥ यथैव वायुः पवते यथा समुद्र एजति॥ एवं ते गर्भ एजतु सहजरा
युणावसर्पत्विस्यवाङ्कमार्ष्टि जातेश्मनि परशुं निधायोपरिष्टा हिरण्यं तेषूत्तराधरे
षूपरिष्टात्प्रांचं कुमारं धारयत्य यमाणमनुमंत्रयते श्माभव परशुर्भव हिरण्यमस्तृतं
भव॥ वेदो वै पुत्रनामासि जीव त्वं शरदः शतं॥ अंगादंगात्संभवसि हृदयादधिजा
यसे॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति यद्यपरा न पतेदं जिनोदकमा
हाय मूर्धानमस्यावसिंचेत्तिलदेवपद्यस्व न मांसं मासि नो दलमवपद्यस्व पथा दिसु

हि॰सू॰॥ पनिर्हरंत्योपासनमग्निर्हरंति सूतिकाग्निः सएषउत्तपनीयएवनास्मिन्किंचनकर्मक्रियतेन्यत्रो
पधूपनाद्थैनंकणैः सर्षपमिश्रैरुपधूपयति शंडोमर्कउपवीरः शौंडिकेरउलूखलः॥ च्यवनोन
॥२॥ श्यतादितस्वाहा॥ आलिखन्विलिखन्ननिमिषन्किंवदंतउपश्रुतिस्वाहा॥ अर्यम्णःकुंभीशत्रुः
पात्रपाणिर्निपुणिस्वाहा॥ आंत्रीमुखःसर्षपारुणोनश्यतादितस्वाहा॥ केशिनीश्वलोमिनी
बजाबजोपकाशिनी॥ अपेतनश्यतादितःस्वाहा॥ कौबेरकाविश्ववासोरक्षोराजेनप्रेषिताः॥ ग्राम
न्सजानयोगच्छंतीप्संतः परिजाकृतान्स्वाहा॥ एतान्हतैतान्बध्नीतेत्ययंब्रह्मणोप्रमशनः कूटदं
तांविकेशाल्लंबस्तनान्स्वाहा॥ नक्तंचारिणउरस्पेशाञ्छूलहस्तान्कपालपान्स्वाहा॥ पूर्वएषां
पितेत्युच्चैश्श्राव्यकर्णकः॥ मातजघन्यागच्छंतिग्रामेविधुरमिच्छंतीस्वाहा॥ नक्तंचारिणीस्व
सासंधिनाप्रेक्ष्यतेकुलं॥ यास्वपंतंजागर्तियस्यैविजातायांमनःस्वाहा॥ तासांत्वंकृष्णवर्त्मने
क्लोमानंहृदयंयकृत्॥ अग्नेयक्षीणीनिर्दहस्वाहेतिप्रतिमंत्रमंगारेष्वावपतिमतःपाणीप्र
क्षाल्यभूमिमालभते॥ यत्तेसुशीमेहृदयंदिविचंद्रमसिश्रितं॥ तस्यामृतत्वस्येशानोमे
हिमाहंपौत्रमघंरुदं॥ वेदतेभूमिहृदयंदिविचंद्रमसिश्रितं॥ तस्यामृतत्वस्येशानोमा
हंपौत्रमघंरुदं॥ अथास्यमेधाजननंदर्भेणहिरण्यंप्रबध्यतदंतर्धायोपरिष्टात्प्रांचंकुमारंधा
८४ दूतस्त्वानग्निःपर्यसरत्॥ नाग्निंदूस्तान्हस्यतिस्तानहंवेदब्राह्मणः ४८

र्यमाणं घृतं प्राशयति भूर्ऋचस्त्वयि जुहोमि स्वाहा ॥ भुवो यजूंषि त्वयि जुहोमि स्वाहा ॥ सुवः सामानि
त्वयि जुहोमि स्वाहा ॥ भूर्भुवः स्वरथर्वाङ्गिरसस्त्वयि जुहोमि स्वाहेत्यथैनं सुष्णाशीताभिरद्भिः स्ना
पयति ■ क्षेत्रियै त्वा निर्ऋत्यै त्वा द्रुहो मुञ्चामि वरुणस्य पाशात् ॥ अनागसं ब्रह्मणे त्वा करोमि
शिवे ते द्यावापृथिवी उभे इमे ■ शं ते अग्निः सहाद्भिरस्तु शं द्यावापृथिवी सहौषधीभिः ॥ शं
मंतरिक्षं सह वातेन ते शं ते चतस्रः प्रदिशो भवंतु ॥ सूर्यमृतं तमसो ग्राह्या यद्देवा अमुञ्चन्नसृजं
व्येनसः ■ एवमहममुं क्षेत्रियाज्जामिशंसाद्द्रुहो मुञ्चामि वरुणस्य पाशादित्यथैनं मातुरुपस्थ
आदधामि ■ ३ ॥ या दैवीश्चतस्रः प्रदिशो वातपत्नीरभि सूर्यो विचष्टे ■ तासां त्वा जरस आद
धामि प्र यक्ष्म एतु निर्ऋतिं पराचैरित्याधायाभिमन्त्रयते मा ते पुत्रं रक्षो हिंसीन्मा धेनुरत्यासा
रिणी ■ प्रियाधनस्य भूया एधमाना स्वे गृह इति प्रस्तात्य दक्षिणं स्तनं मा धापयत्यियं कुमारी
जरां धयतु सर्वमायुरेतु ■ तस्मै स्तनं प्रप्याय स्वायुः कीर्तिर्वर्चो यशो बलम् इत्येवमुत्तरं नामय
तिनरुदति यत्र च यं वदामो यत्र वाभिमृशामसी सुष्ठा वभिमृश्य यथास्यै शिरस्त उदकुं
भमपि हितं निदधात्यापो गृहेषु जाग्रत यथा देवेषु जाग्रथ ■ एवमस्यै सपुत्रायै जायतेन्नि

हि॰ सू॰ स॰ द्वादश्यां मातापुत्रौ स्नातः शुच्यगारं कुर्वंस्तु पनिर्हरंति सूतिकाग्निमतिहरं सोपासनं तमग्निमु
पसमाधाय व्याहृतिपर्यंतं कृत्वा धातारं दातु नो रयिमिति द्वादशाहुतीर्जुहोति त्रयोदशेऽस्य के
३ षामिमं मे वरुण तत्त्वा यामि त्वन्नो अग्ने० वाचयित्वा पुत्रस्य नामदध्याद्व्यक्षरं चतुरक्षरं वा घोष
वदाद्यंतरंतस्थं दीर्घाभिनिष्ठानांतं यत्र वा स्विसु पसर्गस्यात्तद्धि प्रतिष्ठितमिति विज्ञायते पिता मा
तेस्यै भिव्याहरेयातां विज्ञायते च मम नाम प्रथमं जातवेद इति द्वे नामनी कुर्यादिति विज्ञायते च तस्मा
द्द्विनामा ब्राह्मणोर्धुक इति नक्षत्रनाम द्वितीयं स्याद्न्यतरद्गुह्यं स्याद्न्यतरेणैनं मंत्रयेरन् सोम
याजी तृतीयं नामकुर्वीतेति विज्ञायते प्रवासादेत्यागतं वा पुत्रमभिमृशति सोमस्य त्वा द्युम्नेना
भिमृशाम्यग्नेस्तेजसा सूर्यस्य वर्चसेति पशूनां त्वा हिंकारेणाभिजिघ्राम्यसावायुषे वर्चसे
त्युमिति मूर्धन्यभिजिघ्रात्यथास्य दक्षिणेन हस्तेन दक्षिणं हस्तं सांगुष्ठं गृह्णात्यग्निरायुष्मानि
ति पंचभिः पर्यायैरायुष्टे विश्वतो दधदिति दक्षिणे कर्णे जपति यथापुरस्तात् ॥ ६ ॥ अथ ष
ष्ठे मास्यन्नप्राशनमापूर्यमाणपक्षे पुण्ये नक्षत्रेऽग्निमुपसमाधाय व्याहृतिपर्यंतं कृत्वाजुहोतीमं
मे वरुण तत्त्वा यामि वाचयित्वाथैनं दधि मधु घृतमिति त्रिवृत्प्राशयति भूस्त्वयि दधामि भुवस्त्व २

यिद्धामिस्रुवस्त्वयिद्धामीस्यथैनमन्नंप्राशयति॥ अपांत्वौषधीनाꣳरसंप्राशयामि। शिवास्त आप
ओषधयः संत्वनमीवास्त आप ओषधयः सन्त्विति॥ १॥ तृतीये वर्षे चूडाकर्मापूर्यमाणपक्षे पुण्ये
नक्षत्रेऽग्निमुपसमाधाय व्याहृतिपर्यन्तं कृत्वा जुहोतीममेव रुणतत्त्वायामि० वाचयित्वा परेणाग्निं प्रा
ङ्मुखं कुमारमुपवेश्योत्तरतो माता ब्रह्मचारी वानडुहं शकृत्पिंडं धारयति तेनास्य केशान्त्रा। तगृ
ह्णास्यथोष्णशीता आपः सꣳसृजति शीतास्वुष्णा आनीयाप उंदन्तु जीवसइति दक्षिणं गोदानमु
न्त्योषधे त्रायस्वैनमिति स्रूर्ध्वाग्रामोषधिमन्तर्दधाति स्वधिते मैनꣳ हिꣳसीरिति क्षुरेणाभिनि
दधाति देवश्रूरेतानि प्रवपइति प्रवपत्येवस्य वपितरान्नदक्षिणेन नापपत्सविता क्षुरेणा सोमस्य रा
ज्ञो वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्योर्जेमꣳ रय्या वर्चसा सꣳसृजाथेति पश्चाद्येन पू
षा बृहस्पतेरग्नेरिन्द्रस्य चायुषे वपत्। तेन ते हं वपाम्यसावित्युत्तरतो यथा ज्योक्च मनाअ
सत्वा ज्योक्च सूर्यं दृशा इति पुरस्तादुक्ता। यथोदितं चूडाः कारयन्ति यथर्षिं वा संयम्य केशा
न्यत्र पूषा बृहस्पतिः सविता सोमो अग्निः। तेभ्यो निधानं बहुधान्वविन्दन्नन्तरा द्यावापृथि
वी अपः स्ववरिति गोष्ठ उदुंबरे दर्भस्तंबे वा निखनन्ति योस्यरातिर्भवति यथाम्रसंब्राह्मणा

हि॰सू यद्ददातिसर्पिष्मंतमोदनंनापितायेवंविहितः ॥ षोडशेवर्षेगोदानकर्मसशिखंवापयतेशिखा
६ मत्रावशिनष्टीत्येकेषामग्निगोदानोवाभवतिगुरवेगांददाति ॥ ६ ॥ इतिहिरण्यकेशीसूत्रे
विंशतिप्रश्नेप्रथमःपटलः ॥ अथातःश्वग्रहप्रायश्चित्तं ॥ समुपसृजतेयज्ञोपवीत्या
चांतेनाप्रीतेनशरावेणोदकमासिंहत्यसभायांमध्येधिदेवनमुद्धृत्यावोक्ष्याक्षान्न्युप्यसू
ह्यसमूह्यप्रथयित्वोपरिष्टात्सभायांव्यूह्यतृणानितेनकुमारमभ्याहृत्याक्षेषूत्तानंनिपा
त्यदध्यालवणोदकमिश्रेणाभ्युक्षत्याघ्नंतिकं ॥ संदक्षिणतःकुर्कुरःसुकुर्कुकुरोनीलबंधरःकु
नः ॥ ओलवइत्तमुपाह्वयतार्जिमछंबलोअथोरामउदुंबरः ॥ सारमेयोहधावतिसमुद्रमभि
वचाहुशात ॥ बिभ्रंनिकंचरुकंचशुनामग्रः ॥ सुवीरिणः ॥ सुवीरिणः सृज ॥ सृजेकत्रास्य
सृजश्शुनकसृजछत्तू ॥ टेकश्चससरमटकश्चतूलश्चवितूलश्च ॥ अर्जुनश्चलोहितश्वो
त्सजत्वं ॥ शितिम्नत्वं पिशंकरोहतः ॥ अमीएकेसरस्यकाअवधावाततत्तीयस्या ॥ मितो
दिवि ॥ छदयेहिसीसरमसारमेयनमस्तेअस्तुसीसरा ॥ दूत्याहनामवोमातामंडाकको ह ४

वः पिता॥ छद्ये। हसीसरमंसारमेयनमस्ते अस्तु सीसरा॥ दुलाहनामवामातामंडाककोहवः पिता॥ छद्
येहिसीसरमसारमेयनमस्ते अस्तु सीसरा॥ [illegible] समश्वावृषणः पदो न सीसरीदतः॥ छद्ये हिसीस
रसारमेयभमस्ते अस्तु सीसर॥ संतक्षा हंतिचक्रिणो न सीसरीदतः॥ छद्ये हिसीसरमसारमे
यनमस्ते अस्तु सीसरेत्यथाहवरं दृणीष्वेति कुमारमेवाहवरं दृणइत्येवं समुपस्पृजते त्रिरन्हः
प्रातर्मध्यंदिने सायं च कुर्याद्यद्विचागतः स्यात्॥ ७॥ इति हिरण्यकेशीसूत्रे विंशतिप्रश्ने द्विती
यः पटलः॥ २॥ अथातः शूलगवे मा पूर्वमा णापक्षे पुण्ये नक्षत्रे ग्निमुपसमाधाय संपरिस्तीर्य प
यसि स्थालीपाकं श्रपयित्वाभिघार्योद्वास्यापरेणाग्निं द्वे कुटीकृत्वा दक्षिणस्यां शूलग
वमावाहयत्यात्वावहंतु हरयः सचेतसः श्वैतैरश्वैः सह केतुमद्भिः॥ वाताजिरैर्बलवद्भिर्मनो
जवेरायाहि शीघ्रं मम हव्याय शर्वोमित्युत्तरस्यां मीढुषीमं [illegible] जयंतं यथा ढमुदकानि प्रदा
यो पस्तीर्णाभिघारितां स्त्रीनोदनान्कल्पयित्वा यथोढमेवोपस्पृशत्वपुपस्पृशतु मीढ्वान्
मीढुषे स्वाहेत्युपस्पृशतु मीढुषी मीढुष्यै स्वाहा जयंत उपस्पृशतु जयंताय स्वाहेति व्याहृति
पर्यंतं कृत्वौदनानभ्याहृत्य जुहोति भवाय देवाय स्वाहा रुद्राय देवाय स्वाहा शर्वाय देवा
य स्वाहेशानाय देवाय स्वाहा पशुपतये देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय स्वा

हि॰ सू॰ हुतेदेमहतेदेवायस्वाहेत्यथपत्न्योदनंपत्न्यैजुहोतिभवस्यदेवस्यपत्न्यैस्वाहारुद्रस्यदेवस्यपत्न्यैस्वाहा
५ शर्वस्यदेवस्यपत्न्यैस्वाहेशानस्यदेवस्यपत्न्यैस्वाहापशुपतेर्देवस्यपत्न्यैस्वाहोग्रस्यदेवस्यपत्न्यैस्वाहाभी
मस्यदेवस्यपत्न्यैस्वाहामहतोदेवस्यपत्न्यैस्वाहेत्यथमध्यमोदनंजुहोतिजयंतायस्वाहाजयंतायस्वा
हेत्यथसर्वेभ्यओदनेभ्यःसवदायसौविष्टकृतंजुहोत्यग्नयेस्विष्टकृतेस्वाहेत्यभितएतमग्निंगाः
स्थापयंतियथाहूयमानस्यगंधमाजिघ्रेयुःस्वस्तिनःपूर्णमुखंपरिक्रामंत्वितिसर्वेनःप्रदक्षिणंपरिक्र
म्यनमस्तेरुद्रमन्यवइत्येतेनानुवाकेनोपतिष्ठतेप्रथमोत्तमाभ्यांवा ॥ अथातोबौडयविहार
एवगृहपोपस्पृश्यगृहपायस्वाहागृह्युपस्पृश्यगृह्यैस्वाहाद्वारपोपस्पृश्यद्वारपायस्वाहा
द्वारस्थ्युपस्पृश्यद्वार्यैस्वाहेतिचत्वारिपलाशानिददाति ॥ बिणउपस्पृशन्घोषिभ्यःस्वाहानि
षंगिणउपस्पृशन्निषंगिभ्यःस्वाहान्वासारिणउपस्पृशन्नन्वासारिभ्यःस्वाहाप्रयुंजतउप
स्पृशन्प्रयुंजद्भ्यःस्वाहाविचिन्वंतउपस्पृशन्विचिन्वद्भ्यःस्वाहासमश्नंतउपस्पृशन्समश्नद्भ्यः
स्वाहेतिदशशाखापराणिदेवसेनाउपस्पृशन्देवसेनाभ्यःस्वाहेतिदशशाखापराणियाआ
ख्यातादेवसेनायाश्चानाख्याताउपस्पृशन्ताभ्यःस्वाहेत्यथपर्णपुटंकृत्वातस्मिन्नुप रामू
स्तीर्णाभिघारितमोदनपिंडमवदायपरागव्युत्तिंगत्वावृक्षआसजतिनिषंगिणउपस्पृश ८

लानिषंगिणस्वाहेत्यथोपतिष्ठते नमो निषंगिण इषुधिमते तस्कराणां पतये नम इत्यथ चंदनसुरो
दकाक्षताक्षत गोमयदूर्वास्तंबोदुंबरपलाशशमीवैकंकताश्वत्थेन गोवाले नेति गाः प्रोक्षति
दृषाणमेवायेशिवोभवशिवेत्यथ शिवो हेवभवत्यथेनं क्षेत्रपत्यस्य पयसि स्थालीपाकं
श्रपयित्वाभिघार्योद्वास्य गवां मार्गेनग्नौ क्षेत्रपतिं यजति चतुर्षु सस्रुवा पलाशे घृतं त
थ्येवावाहयति यथाश्रृलगवं तं नूतैर्यजते पाकोदिवोथोपतिष्ठते क्षेत्रस्य पतिना क्षेत्रस्य
पत इत्यथैतस्य क्षेत्रपत्यस्य ये सनाभयो भवंति ते प्राश्नंति यथैवैषां कुलधर्मो भवति॥
॥१०॥ इति हिरण्यकेशीसूत्रे द्वि॰ शतिप्रश्ने तृतीयः पटलः॥ ३॥ (७) अमावास्यायामप
राह्णे मासिकमपरपक्षस्य वा युक्ष्वहःसु पितृभ्योन्नं संस्कृत्य दक्षिणाग्रान्दर्भानास
नानि कल्पयित्वा ब्राह्मणान्शुचीन्मंत्रवतः समंगानयुज आमंत्रयते योनिगोत्रमंत्रासं
बंधान्नार्थापेक्षो भोजयेदग्निमुपसमाधाय दक्षिणाप्रागग्रैर्दर्भैः परिस्तीर्यैकपवित्रेणोल
हितायामाज्यस्थाल्यामाज्यं संस्कृत्य प्रसव्यं परिषिच्योदुंबरमिध्ममभ्याधायौदुंबर्या

हि० स
६

दर्व्यांजुहोत्याज्यभागांतं कृत्वा प्राचीनावीती पितॄन्नावाहयत्यायात पितरः सोम्यागंभीरैः प
थिभिः पूर्व्यैः॥ प्रजामस्मभ्यं ददतो रयिं च दीर्घायुत्वं च शतशारदं चेत्येतामेव दिशमभ्य
पः प्रसिंचत्यायो देवीः प्रहिणुताग्निमेतं यज्ञं पितरो नो जुषंतां॥ मासीमामूर्जमुतये
भजंतेते नो रयिं सर्ववीरं नियच्छत्विति यज्ञोपवीती व्याहृतिपर्यंतं कृत्वा प्राचीनावीती
जुहोति सोमाय पितृमते स्वधा नमो यमायांगिरस्वते पितृमते स्वधा नमो याः प्राचीः स
भवंत्याप उत्तरतश्च याः॥ अद्भिर्विश्वस्य भुवनस्य धर्त्रीभिरंतरन्यं पितुर्दधे स्वधा नमः॥
अंतर्दधे पर्वतैरंतर्मह्या पृथिव्या॥ दिवा दिग्भिरनंताभिरूतिभिरंतरन्यं पितामहा
द्दधे स्वधा नमः॥ अंतर्दध ऋतुभिरहोरात्रैः ससंधिभिः॥ अर्धमासैश्च मासैश्चां
तरन्यं प्रपितामहाद्दधे स्वधा नमः इत्यथ नामधेयैर्जुहोत्यमुष्मै स्वधा नमोऽमुष्मै स्व
धा नमः इति यन्मे माता प्रलुलोभ चरत्यननुव्रता॥ तन्मे रेतः पिता वृंक्तामाभुरन्योपप
द्यतां स्वधा नमः इत्येवं द्वितीयां तथा तृतीयां यन्मे पितामही यन्मे प्रपितामहीति मंत्रं सन्नमति॥१०॥

६

येचेहपितरोयेचनेहयाꣳश्चविद्मयाꣳउचनप्रविद्म॥अग्नेतान्वेत्थयदितेजातवेदस्तयाप्रत्त
ꣳस्वधयामदंतुस्वधानमः॥यद्वःक्रव्यादंगमदहल्लोकान्नहंयंप्रणयंजातवेदाः॥यद्वोहंपु
नरावेशयाम्यरिष्टाःसर्वैरंगैःसंभवतपितरस्वधानमः॥वहाज्यंजातवेदःपितृभ्योय
त्रैतान्वेत्थनिहितान्पराके॥आज्यस्यकुल्याउपतान्क्षरंतुसत्याएषामाशिषःसंतुका
मैःस्वधानमइत्येवंद्वितीयांतथातृतीयांपितामहेभ्यःप्रपितामहेभ्यइतिमंत्रंꣳसंन्न
मस्येवमन्नस्यजुहोतिवहान्नमितिमंत्रंꣳसन्नमस्यथसोविष्टकृतींजुहोत्यग्नयेकव्य
वाहनायस्विष्टकृतेस्वधानमइत्यथान्नमभिमृशतिपृथिवीतेपात्रंद्यौरपिधानंब्रा
ह्मणस्यत्वामुखेजुहोमिब्राह्मणानांत्वाप्राणापानयोर्जुहोम्यक्षितमसिमापितॄणांक्षेष्ठा
अमुत्रामुष्मिंल्लोकेपृथिवीसमातस्याग्निरुपद्रष्टादत्तस्याप्रमादाययपृथिवीतेपात्रंद्यौ
रपिधानंब्राह्मणस्त्वामुखेजुहोमिब्राह्मणानांत्वाप्राणापानयोर्जुहोम्यक्षितमसिमापि
तामहानांक्षेष्ठाअमुत्रामुष्मिंल्लोकेंतरिक्षंꣳसमंतस्यवायुरुपद्रष्टादत्तस्याप्रमादाय

हि॰ सू॰ पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षि
७ तमसि मा प्रपितामहा मोक्षेष्ठा अमुत्रामुत्रामुष्मिन्लोके द्यौः समा तस्यादित्य उपद्रष्टा दत्तस्या
प्रमादायेति ब्राह्मणानुपस्पर्शयति प्राणे निविश्यामृतं जुहोमीति ॥ ११ ॥ भुंजानान्समी
क्षते ब्रह्मणि म आत्मामृतत्वायेति तृप्तस्कन्धतोनुप्रव्रज्य शेषमनुज्ञाप्योदकुंभं दर्भमुष्टिं चादा
य दक्षिणपूर्वमवान्तरदेशं गत्वा दक्षिणाग्रान्दर्भान्संस्तीर्य तेष्ववाचीनपाणिर्दक्षिणापवर्गा
ꣳस्त्रीनुदकांजलीन्निनयति मार्जयंतां पितरः सोम्याः सोमार्जयंतां पितामहाः सोम्याः सोमार्जयं
तां प्रपितामहाः सोम्याः सह इत्य सावववनेनिंक्ष्वा सावववनेनिंक्ष्वेति वा लेपवाचीनपाणिर्दक्षि
णापवर्गान्पिंडान्ददात्येतत्ते ततासाविति पित्रे पिंडं ददात्येतत्ते पितामहासाविति पितामा
हायैतत्ते प्रपितासाविति प्रपितामहाय तूष्णीं चतुर्थꣳ सकृत्ता रु तोथ यदि नामधेयानि न
विंद्यात्स्वधा पितृभ्यः पृथिविषद्भ्य इति पित्रे पिंडं दद्यात्स्वधा पितृभ्योंतरिक्षसद्भ्य इति पि
तामहाय स्वधा पितृभ्यो दिविषद्भ्य इति प्रपितामहायांजनाभ्यंजने वासश्चानुपिंडं ददात्यांक्ष्वा
सावंक्ष्वासाविति त्रिरांजनमभ्यंक्ष्वासावभ्यंक्ष्वासाविति त्रिरभ्यंजनमेतानि वः पितरो वा ७

सां स्यतोनोन्यस्मिन्तिरोमायूद्रुभिर्निरदृशा भूर्णास्तुकां वाछित्वान्यस्यत्तिपूर्ववयसिस्वं लोमछि
त्वोत्तरेथपात्रं संक्षाल्य पुत्रान्पौत्राननभिनिर्यमत्तीरापो मधुमत्तीरिमाः स्वधां पितृभ्यो अमृ
तं दुहानाः॥ आपो देवीरुभयां स्तर्पयंतिनद्दीरिमाउदन्वती वेतस्विनीः स्रुतीर्थ्या अमुष्मिन्
लोक उपवः क्षरंत्विति प्रसव्यं परिषिच्यन्युब्जपात्रं पाणीव्यस्य स्यदक्षिणमुत्तरमुत्तरं च
दक्षिणं नमोवः पितरो रसायेति नमस्कारैरुपतिष्ठते तत उदकांतं गत्वा त्रीनुदकांज
लीन्निनयति॥१२॥ एषत्ते तत मधुमां ऊर्मिः सरस्वान्यावानग्निश्च पृथिवी च तावत्य
स्य महिमा तावंतमेनं भूतं ददामि यथाग्निरक्षितोनुपदस्त एवं महां पित्रे क्षितोनुपदस्त स्वधा
भवतां तां स्वधामक्षितं तैः सहोपजीवासावृचस्ते महिमा॥ एषते पितामह मधुमां ऊ
र्मिः सरस्वान्यावान्वायुश्चांतरिक्षं च तावत्यस्य मात्रा तावानस्य महिमा तावंतमेनं भूतं द
दामि यथावायुरक्षितोनुपदस्त एवं महां पितामहायाक्षितोनुपदस्त स्वधाभवतां तां स्व
धामक्षितं तैः सहोपजीवासौ यजूंषि ते महिमा॥ एषते प्रपितामह मधुमां ऊर्मिः सरस्वा
न्यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावानस्य महिमा तावंतमेनं भूतं ददामिय

हि॰ सू॰

८

थादित्योक्षितोनुपदस्त एवं मह्यं प्रपितामहायाक्षितोनुपदस्तस्स्वधाभवतां तं स्वधामक्षितं
तेः सहोपजीवासौ सामा जितेम हिमे ति प्रत्येत्यप्रतिष्ठित सुद पात्रे णोपयवर्त्त्यासि परायात
पितरः सोम्या गंभीरैः पथिभिः पूर्व्यैः॥ अथ मासि पुनरायात नो गृहान्हविरत्तुं सुप्रज
सः सुवीरा इत्येतेन माध्याच र्षब्यो रव्यातं तत्रमां संनियत्तमां स्सा श्नायेशाकं॥१३॥
इति हिरण्यकेशीसूत्रे विंशति प्रश्ने चतुर्थः पटलः॥४॥ अष्टका व्याख्यास्यामो माघ्याः
पौर्णमास्या योऽपरपक्षस्तस्याष्टमीमेकाष्टकेत्याचक्षते ततः पूर्वेद्युरन्वाधेयपरा
ग्निमुपसमाधाय दक्षिणाप्रागग्रैर्दर्भैरग्निं परिस्तीर्यैकपवित्रं। तस्मिन्हिं ता नि
चत्वारि व्रीहीन्शरावाणि निर्वपतीमममूपं चतुःशरावं निर्वपामि केशावहं पि
तृणां सांपरायेदं चेन सवित्राप्रसूता देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो वो जुष्टं गृह्णामीत्येतेनैव पवित्रे यान्तू
क्षां प्रोक्षणीः संस्कृत्य तूष्णीं प्रोक्ष्य तूष्णीमवहत्य यथा पुरोडाशमेवं चतुर्षु कपाले
पुत्तूष्णीं श्रपयित्वाभिघार्योद्वास्य प्रसव्यं परिषिच्यौदुंबरमिध्ममभ्याधायौदुंबर्यौ ८

दर्भासुपस्तीर्णाभिघारितं दक्षिणाप्राचि संततं परं परमवदाय दक्षिणाप्राचि संततं परं परं जुहोत्यु
लूखला ग्रावाणो घोषमकृत हविः कृण्वंतः परिवत्सरीणां ॥ एकाष्टके सुप्रजा वीरवंतो वयं
स्याम पतयो रयीणां ॥ स्वधा नमः ॥ अपूपं देव घृतवंतमग्ने स्वधावंतं पितॄणां तर्पणाय ॥ यथा
तथं वह हव्यमग्ने पुत्र पितृभ्य आहुतिं जुहोमि स्वधा नमः ॥ अयं चतुःशरावो घृतवानपूपः प
यस्वानग्ने रयिमान्पुष्टिमांश्च ॥ प्रतिनंदंतु पितरः संविदानाः स्विष्टीयं स्कृद्धतो ममास्तु
स्वधा नम इत्यपूपान्नस्य जुहोती यमेच साया प्रथमा व्योछदेकाष्टका तपसोतप्यमाना
या प्रथमा व्योछद्दिस्यपूपस्यान्नस्येति समवदाय सर्पिर्मिश्रस्य जुहोत्यग्नये कव्यवाहना
य स्वधा नम इति तं घृतवंतं मधुमंतमन्नवंतं श्राद्धाभिमर्शनेनाभिमृश्य पिंडानामा
वृता पिंडां दद्यादिति तेन ब्राह्मणान्विधावत परिवेवेष्टितेभ्यो यथाश्रद्धमन्नं धनं च दद्या
त्ति प्रसिद्धमोदकांजलिदाना यथा मासिके ॥ १४ ॥ श्वोभूते पितृभ्यो गामालभतेग्निमु
पसमाधाय दक्षिणाप्रागग्रैर्दर्भैः परिस्तीर्य मां पितृभ्यो गामुपाकरोमि तामेस मेताः पित
रो जुषंतां मिदद्यस्थती घृतवती स्वधावती सामे पितॄन्त्सा परायधिनोतु स्वधा नम इत्युपा
करणीयं हुत्वैकेन बर्हिषोपकश्टलयाच वपां श्रपयित्वोदुंबर्योपाकरोति पितृभ्यस्त्वा जुष्टामुपा

हि० सू० करोमीत्यथैनां प्रोक्षति पितृभ्यस्त्वा जुष्टां प्रोक्षामीति तां प्रोक्षितां पर्यग्निकृत्वा तामपरेणाग्निं प्रत्य
क्शिरसं दक्षिणापदीं संज्ञपयंति संज्ञप्यायै तूष्णीमद्भिः प्राणानाप्याय्य तूष्णीं वपां हृदयं म
९ तस्नेउ धरस्योदुंबर्या वपाश्रपण्या वपां श्रपयत्यौदुंबरेषु शूलेषु पृथगितराणि श्रपयित्वाभि
घार्योद्वास्य प्रसव्यं परिषिच्योदुंबरमिध्ममभ्याधायोदुंबर्या दर्व्योपस्तीर्णाभिघारितां वपां जुहोति
वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितान्पराके॥ मेदसः कुल्या उप[illegible]तान्स्रवंतु सत्या
एषामाशिषः संतु कामैः स्वधा नम इति सर्वहुतं वपां जुहोति शेषमुपाकृत्य ब्राह्मणान्भोजयेदु
पस्थितेन ओदनस्य मांसानामिति समवदाय सर्पिर्मिश्रस्य जुहोत्येकाष्टका पश्यति होह
मानामन्नं मांसवद्धृतवत्स्वधावत्॥ ब्राह्मणेरत्ति पूतमन्नं तमक्षितं तन्मे अस्तु स्वधा नमः॥
एकाष्टका तपसा तप्यमाना संवत्सरस्य पत्नी दुदुहे प्रपीना॥ तं दोहमुपजीवाथ पितरः सं
विहाना स्विष्टियं स्कृहुतो ममास्तु स्वधा नमः॥ संवत्सरस्य प्रतिमामिति हुतान्नस्य मांसाना
मिति समवदाय सर्पिर्मिश्रस्य जुहोत्यग्नये कव्यवाहनाय स्विष्टकृते स्वधा नम इति प्रसिद्धमो
दकांजलिदानाद्यथा मासिके न्नधनदाने त्वत्रानियतिश्चो भूतेमां सशेषेण पितृभ्योन्नं सं ९
स्कृत्य स्वम ग्नेऽयासि प्रजापत इति जुहोति प्रसिद्धमोदकांजलिदानाद्यथा मासिके।।१५।। इति

हिरण्यकेशीसूत्रे विंशतिप्रश्ने पंचमः पटलः॥ ५॥ अथातः श्रवणाकर्म तद्यापौर्णमासी श्रवणेन युज्या
त्तस्यामुपरिष्टात्सायमग्निहोत्रस्य दक्षिणाग्निमुपसमाद्धायौपासनमनाहिताग्निः स्थालीपाक
ं श्रपयित्वाक्षतधाना अक्षता लाजान्सक्तून्किंशुकान्यांजनाभ्यंजने आज्यमिति दर्व्यामुप
स्तीर्य तेषामेवान्नानां समवदाय सर्पिर्मिश्रस्य जुहोति नमोग्नये पार्थिवाय पार्थिवानाम
धिपतये स्वाहा नमो वायवे विभुमत आंतरिक्षाणामधिपतये स्वाहा नमः सूर्याय रोहिता
य दिव्यानामधिपतये स्वाहा नमो विष्णवे गौराय दिश्यानामधिपतये स्वाहेति किंशुकान्या
ज्येन संयुज्य जुहोति जग्धो मशको जग्धा विचष्टिर्जग्धो व्यध्वरो जग्धो व्यध्वरो जग्धा विच
ष्टिर्जग्धो मशको जग्धा विचष्टिर्जग्धो मशको जग्धो व्यध्वर इत्युदकुंभं दर्भमुष्टिं चादाय
प्राङ्मुखो निष्क्रम्य प्रांचो दर्भान्संस्तीर्य तेषु चतुरो बलीन्याहरति ये पार्थिवाः सर्पास्तेभ्य इदं
बलिं हरामि य आंतरिक्षा ये दिव्या ये दिश्या इत्यत्रांजनाभ्यंजने दत्वोपतिष्ठते नमो अस्तु
सर्पेभ्य इत्येतैस्त्रिभिरुदकुंभमादाय त्रिः प्रदक्षिणमावसथं परिषिंचन्परिक्रामेद्धावता काम
य एते तावन्तो मे सर्पाणां चक्रामेयुरित्यपश्वेतपदाजहि पूर्वेण चापरेण च॥ सप्तचमानुषीरिमा
स्तिस्रश्च राजबंधवैर्नैव श्वेतस्याभ्याचाराहरेणहिजंघानकंचन श्वेताय वैदर्वायनमो नमः श्वेताय वै

हि॰ स्॰ सर्वा येत्स्थोपातेभ्यस्ते समीचीनामासि प्राचीदिगित्येतैर्मंत्रैः प्रतिदिशं नित्यमत ऊर्ध्वं बलिं हरत्यामार्ग
शीर्ष्या नात्र किंशुकहोमानपरिषेचनं विद्यते निरवदास्यं निरवदास्यं नित्यं नतो बलीन्हरति॥
॥१६॥ इति हिरण्यकेशीसूत्रे विंशतिप्रश्ने षष्ठः पटलः॥ ६॥ आग्रहायणीं व्याख्यास्यामो मा
र्गशीर्ष्यां पौर्णमास्यामग्निमग्निमुपसमाधाय संपरिस्तीर्य पयसि स्थालीपाकं श्रपयित्वाक्षि
१० घार्यौ ह्यस्यभ्याहुतिपर्यंतं कृत्वा जुहोतीडायै सृप्त घृतवच्चराचरं जातवेदो हविरिदं जुषस्व॥
ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानामिह रंतिरस्तु पुष्टिः स्वाहा॥ यां जनाः प्रतिनंद
रात्रिं धेनुमिवायतीं॥ संवत्सरस्य या पत्नी सा नो अस्तु सुमंगली स्वाहा॥ शिवा पशुभ्यो दा
रेभ्यः शिवानक्तं शिवादिवा॥ संवत्सरस्य या पत्नी सा नो अस्तु सुमंगली स्वाहा॥ पौर्ण
मासी पुरयंस्यायां स्व परापरान्॥ मासार्धमासान्विभजती सा नः पूर्णाभिरक्षतु स्वाहेति
सौविष्टकृतं जुहोति स्विष्टमग्ने अभितत्पृणाहि विश्वा देव पृतना अभिष्य। उरुं नः पंथां
प्रदिशान्विभाहि ज्योतिष्मद्धेह्यजस्रं न आयुरिति ततः पाणी प्रक्षाल्याग्रे मिमारुभते प्रतिक्ष १०
त्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु। प्रत्यंगेषु प्रतितिष्ठाम्यात्मन्प्रतिप्राणेषु

लि

प्रतितिष्ठामि पुष्टे॥ प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञे॥ त्रया देवा एकादश त्रयस्त्रिंशाः सुराध
सः॥ बृहस्पतिपुरोहिता देवस्य सवितुः सवे देवा देवैरवंतु मेति तेषां दक्षिणाग्र हपतिरुपवि
शति स्युत्तरा उत्तरे प्रजोत्यत्यानुपूर्व्येण तेषां ये मंत्रविदिस्ते मंत्रां जपति स्योना पृथिवि भवानृ
क्षरा निवेशनी॥ यच्छा नः शर्म सप्रथाः॥ बडित्था पर्वतानां मि तिद्वाभ्यां दक्षिणैः पार्श्वैः संविश
स्युदायुषेस्युत्तिष्ठ त्युदस्थामात्तनाअभूमेत्युथा यजपंत्ये वं रात्रेः त्रिः संजिहते ब्राह्मणान
न्नेन परिविष्य पुण्याहं स्वस्त्ययनमृद्धिमिति वाचयित्वाथेतां रात्रिं वसति॥ १७॥ इति हि
रण्यकेशीसूत्रे विंशतिप्रश्ने सप्तमः पटलः॥ ७॥ अथात उपाकरणोत्सर्जने व्याख्यास्यामः श्र
वणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां वाध्यायोपाकर्मी अग्निमुपसमाधाय व्याहृति
पर्यंतं कृत्वा पंचकांडऋषीन्जुहोति प्रजापतये कांडऋषये स्वाहा सोमाय कांडऋषये स्वाहाग्नये
कांडऋषये स्वाहा विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः स्वाहा स्वयंभुवे कांडऋषये स्वाहेति कांडर्ष
यः कांडनामानि वासा विन्नीमृग्वेदं यजुर्वेदं सामवेदमथर्ववेदं सदसस्पतिमिति हुत्वा

हि॰ सू॰ स्मा॰ त्रीनादितोऽनुवाकानधीयंते कंड्रादीन्वा सर्वानृयाक्षिष्यतीति पद्यते स्विष्टकृदंतं कृत्वात्र्यहमेकाहं वाक्षम्यस्य
थाध्यायमध्येतव्यमिति वदंति तैषीपक्षस्य रोहिण्यां पौर्णमास्यां चोत्सर्गतः सगणः प्राचीमुदीचीं वा
दिशमुपनिष्क्रम्य यत्रापः स्रवाः स्रवागाहाः स्तद्वगाह्याघमर्षणेन त्रीन्प्राणायामान्कृत्वा स
पवित्रैः पाणिभिरापोहिष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृ
भिः पवमानः सुवर्जन इति चैतेनानुवाकेन स्नात्वा दर्भान्यन्योन्य संप्रयच्छंतो दित्संत एवान्यो
न्यं ततः शुचौ देशे प्राचीनप्रवणे प्रागग्रैर्दर्भैरुदगपवर्गाण्यासनानि कल्पयंति ॥ १० ॥ ॥
ब्रह्मणे प्रजापतये बृहस्पतयेऽग्नये वायवे सूर्याय चंद्रमसे नक्षत्रेभ्य इंद्राय राज्ञे यमाय राज्ञे वरुणाय
राज्ञे सोमाय राज्ञे वैश्रवणाय राज्ञे वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः साध्येभ्य ऋभु
भ्यो भृगुभ्यो मरुद्भ्योऽथर्वभ्योऽङ्गिरोभ्य इति देवगणानां ॥ विश्वामित्रो जमदग्निर्भरद्वाजोऽथ
गौतमः ॥ अत्रिर्वसिष्ठः कश्यप इत्येते सप्तर्षयो निवीति । नत्वुत्तरत उदीचीनप्रवण उदगग्रैः
प्रागपवर्गाण्यासनानि कल्पयंति ॥ विश्वामित्राय जमदग्नये भरद्वाजाय गौतमायात्रये वसि ३१

भायकश्यपायवसिष्ठकश्यपयोरंतरालेरुंधत्यैकल्पयंति॥ दक्षिणतः प्राचीनप्रवणेगस्त्यायततए
कवेर्घोतेभ्यः कृष्णद्वैपायनाय [illegible]जातूकर्ण्यायलरुक्षायतृणबिंदवेवर्मिणेवरूथिनेवाजि
नेवाजश्रवसेसत्यश्रवसेसुश्रवसेसुतश्रवसेसोमशुष्मायणायसत्ववतेबृहदुक्थायवा
मदेवायवाजिरत्नायहर्यज्वायनायोदमयायगौतमायऋणंजयायऋतंजयायकृतंजया
यधनंजयायबभ्रवेत्र्यरुणायत्रिवर्षायत्रिधातवेशिबिंतायपराशरायविष्णवेरुद्राय
मा स्कंदायकाशीश्वरायज्वरायधर्मायार्थायकौयक्रोधायवसिष्ठायेंद्रायत्वष्ट्रेकर्त्रेधर्त्रेधात्रे
मृत्यवेसवित्रेसावित्र्यैवेदेभ्यश्चपृथक्पृथक् ऋग्वेदाययजुर्वेदायसामवेदायाथर्ववेदा
यतिहासपुराणायेतिदक्षिणतः प्राचीनावीतिनोदक्षिणाप्रवणेदक्षिणाग्रैः प्रत्यगपवर्गा
ण्यासनानिकल्पयंति॥ ११॥ वैशंपायनायपैंगयेतित्तिरायोखायात्रेयायपदकाराय
कौंडिन्यायवृत्तिकारायसूत्रकारेभ्यः सत्याषाढायप्रवचनकर्तृभ्यआचार्येभ्यऋषि
भ्योवानप्रस्थेभ्यः ऊर्ध्वरेतोभ्यएकपत्नीभ्यइतियथास्वंपितृभ्योमातामहेभ्यश्चक

हि० सू० त्यदं त्यमुष्मैक ल्पयाम्यमुष्मै कल्पयामीत्यासनेनामुं तर्पया म्यमुं तर्पयामीत्युदकेनामु
ष्मैनमो मुष्मै नम इति गंधपुष्पधूपदीपैरमुष्मै स्वाहामुष्मै स्वाहेत्यन्नेनामुं तर्पयाम्यमुं त
१२ र्पयामीति फलोदकेनामुष्मै नमो मुष्मै नम इत्युपस्थायापरेण वेदिमग्निमुपसमाधाय
व्याहृतिपर्यंतं कृत्वा पंच कांडऋषीञ्जुहोति कांडर्षयः कांडनामानि वा सावित्रीमृग्वेदं यजु
र्वेदं सामवेदं स... दसस्पतिमिति हुत्वा प्रथमेनानुवाकेनाधीयंते कांडादीन्वा सवान्
जयादीन्प्रतिपद्यते स्विष्टकृदं तं कृत्वाऽथ हमेकाहं वाक्षरस्य यथाध्यायमध्येतव्यमिति वदं
ति कांडात्कांडादिति द्वाभ्यामुदकांते दूर्वारोपयंत्युदधिमर्मिमंतं कृत्वा प्राचीमुदीचीं वा
दिशमालभितो राजिं धावंति प्रसृत्याघ्र पेः सक्तुभिरोदनेनेति ब्राह्मणाँश्च तर्प
यंत्येवं पारायण समाप्तो कांडात्कांडादिति दूर्वारोपेणोदधिधावनवर्जं नित्यमेवा शिव
द्भिर्देवानृषीं पितॄंश्च तर्पयंति तर्पयंति ॥२०॥ इति हिरण्यकेशीसूत्रे विंश १२

त्ति प्रश्ने अष्टमः पटलः ॥ ८ ॥ वैशंपायनाय ॥ ब्रह्मणे प्रजापतये ॥ अथातउपाकरणो
त्सर्जने ॥ आग्रहायणींव्याख्यास्यामः ॥ अथातः श्रवणाकर्म ॥ श्वोभूतेपितृभ्यो
१२ गामालभन्ते ॥ अष्टकांव्याख्यास्यामः ॥ एषतेतत ॥ भुंजानान्समीक्षेते ॥ येन्वैह
पितरः ॥ अमावास्यायामपराह्णे ॥ अथातो बोध्यविहार एव ॥ अथातश्शूलग
वं ॥ अथातस्त्र्यहप्रायश्चित्तं ॥ तृतीयेवर्षे चूडाकर्म ॥ अथषष्ठेमास्यन्नप्रा
शनं यादेवीश्चतस्रः ॥ यथैव वायुः पवते ॥ अथातः पुंसवनं ॥ अथातः सीमं
तोन्नयनं ॥ २० ॥ हरिः ॐ ॥ ॥ शक १७४६ तारननामसंवत्सरेआ
श्विनकृष्णप्रतिपदिनासन्नामेइदं पुस्तकं देवधरोपनामकेन शिवरामेण शिव
लिखितं ॥ स्वार्थेपरार्थेच ॥ श्रीलक्ष्मीकेशवार्पणमस्तु ॥ ६ ६ १२

॥इति हिरण्यकेशीसूत्रे विंशतिप्रश्नः समाप्तः॥

॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

हिरण्यकेशिसूत्र

॥इतिहिरण्यकेशीसूत्रे विंशतिप्रश्नः समाप्तः॥

॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

हिरण्यकेशीसूत्र

हि॰ध॰सू॰२७

१

श्रीगणेशायनमः॥हरिःॐ॥पाणिग्रहणादधिगृहमेधिनोर्व्रतंकालेयोर्भोजनमतृप्तिश्चान्नस्यपर्वसुचोभयोरुपवासऔपवस्तमेवकालां
तरेभोजनंतृप्तिश्चान्नस्ययच्चैनयोःप्रियंस्यात्तदेतस्मिन्नहनिभुंजीयातामधश्चशयीयातांमैथुनवर्जनंचश्वोभूतेस्थालीपाकस्
स्यापचारोनित्यंलोकउपदिशंतियस्मिन्देशेग्निमुपसमाधास्यन्स्यात्तत्रप्राचीरुदीचीश्चतिस्रस्तिस्रोलेखालिखित्वा
वास्याभिषिच्येतदुदकशेषमुत्तरेणपूर्वेणवान्यदुपनिदध्यान्नित्यमुदधानान्यद्भिररिक्तानिस्युर्गृहमेधिनोर्व्रतंव्यहन्यसंवे
शनंमृतौत्वसन्निपातोदारेणानुव्रतमंतरालेपिविदारएवब्राह्मणवचनाच्चसंवेशनंस्त्रियोवाससेचसंनिपातःस्याद्याव
संनिपातंचैवसहचर्यात्ततोनानोदकोपस्पर्शनमपिवालेपान्प्रक्षाल्ययादौचाचम्यशोक्षपणंशानांसर्ववर्णानांस्वधर्मा
नुष्ठानेपरमपरिमितंसुखंततःपरिवृत्तौकर्मफलशेषेणजातिंरूपंवलंमेधांप्रज्ञांद्रव्याणिस्वधर्मानुष्ठानमितिप्रतिपद्यतेतच्च
क्रवदुभयोर्लोकयोःसुखएववर्ततेयथौषधिवनस्पतीनांबीजस्यक्षेत्रकर्मविशेषेफलवृद्धिरेवमेतेनदोषफलवृद्धि
निरुक्तास्तेनोभिशस्तोब्राह्मणोराजन्योवैश्योवापरस्मिन्लोकेपरिमितनिरयेवृत्तेजायतेचांडालोब्राह्मणःपौल्कसोराज शिव
न्योवैणोवैश्यएवमेतेनवर्णपरिध्वंसादोषफलैःकर्मभिर्दोषफलासुयोनिषुजायतेवर्णपरिध्वंसायांचांडालोप १

स्पर्शनेसंभाषायांदर्शनेचदोषस्तत्रप्रायश्चित्तमवगाहनमपामुपस्पर्शनेसंभाषायांब्राह्मणसंभाषादर्शनेज्योतिषांदर्श
नं॥१॥आर्याःप्रयतावैश्वदेवेन्नंसंस्कर्तारःस्युर्माषांकासंस्रवस्तुमित्यभिमुखोन्नंवर्जयेत्केशानंगंवासश्चारुभ्याम
उपस्पृशेद्दार्याधिष्ठितावाशूद्राःसंस्कर्तारःस्युस्तेषांसरवाचमनकल्पोधिकमहरहःकेशश्मश्रुलोमनखवापनमु
दकोपस्पर्शनंचसहवाससापिवाष्टमीष्वेवपर्वसुवावपेरन्परोक्षमन्नंसंस्कृतमग्नावधिश्रित्याद्भिरभ्योक्षेत्तद्देव
पवित्रमित्याचक्षतेसिद्धेन्नेतिष्ठन्भूतमितिस्वामिनेब्रूयात्तत्सुभूतमितिप्रतिवचनोगृहमेधिनोयद्दशनीयस्यहोमाब
लयश्चस्वर्गपुष्टिसंयुक्तास्तेषामुपयोगेद्वादशाहंब्रह्मचर्यमधःशय्याक्षारलवणामधुमांसवर्जनंचोत्तमस्यैकरात्रमुप
वासोबलीनांतस्यतस्यदेशसंस्कारोहस्तेनपरिमृज्यावोक्ष्यन्युप्यपश्चात्परिषेचनमोपासनेपचनेवाषड्राद्यैः
प्रतिमंत्रंहस्तेनैतानाहुतीर्जुहुयादेवंबलीनांदेशेसमवेतानांसकृत्सकृदन्तेपरिषेचनंसतिसूपसंस्पृष्टेनकार्योअ
परेणाग्निंसप्तमाष्टमाभ्यामुदगपवर्गमुदधानेसन्निधौनवमेनमध्येगारस्यदशमैकादशाभ्यांप्रागपवर्गमुत्तरार्धेपू
र्वार्धेगारस्योत्तरैश्चतुर्भिःशय्यादेशेकामलिंगेनदेहल्यामंतरिक्षलिंगेनोत्तरेणापिधान्यामुत्तरैर्ब्रह्मसदनेदशभि
र्दक्षिणतःपित्र्यलिंगेनदेहल्याममंतरिक्षलिंगेनोत्तरेणापिधान्याममुत्तरैःप्राचीनावीत्यवाचीनपाणिर्दद्यात्उत्तरीययथादैवतंतेषांनाना

हि·सू·ध·२७ परिषेचनं धर्मभेदान्नक्तमेवोत्तमेन वैहायसमेतानव्यग्रो यथोपदेशं कुरुते निःस्वः स्वर्गः पुष्टिश्चार्थं च देयमतिथीनेवाग्रे भोजयेत्
२ कुमारान्रोगसंयुक्तान् स्त्रीश्चान्तर्वत्नीः काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयातामभावे तृणानि भूमिरुदकं कल्याणी वाग
एतानि वै सतो गारे न क्षीयन्ते कदाचनेत्येवं वृत्तावनन्तलोकौ भवतो ब्राह्मणायानधीयानायासनमुदकमन्नमिति देयं न
प्रत्युत्तिष्ठेदभिवादनाय वोत्तिष्ठेदप्यभिवाद्यश्चेद्राजन्यवैश्योश्च ॥ २१ ॥ शूद्रमभ्यागतं कर्मणि नियुञ्ज्यादथास्मै दद्याद्दासा वा राज
कुलाद्धृत्यातिथिवच्छूद्रं भोजयेयुर्नित्यमुत्तरवासः कार्यमपि वा सूत्रमेवोपवीतार्थे यत्र भुज्यते तत्समूह्य निहृत्यावोक्ष्य तं दे
शममत्रेभ्यो लेपान्संगृह्याद्भिः संसृज्य शुचौ देशे रुद्राय निनयेदेवं वास्तु शिवं भवति ब्राह्मण आचार्यः स्मर्यते त्वापदि ब्राह्मणे
न राजन्ये वैश्ये वाध्ययनमनुगमनं पश्चाद्गन्तोर्ध्वं ब्राह्मण एवाग्रे गतिः स्यात्सर्वविद्यानामप्युपनिषदामुपाकृत्यानध्ययनं
तदहरधीत्य चाभिप्रक्रमणं सद्यो यदि त्वरेत गुरोः समीक्षायाः स्वाध्यायमधीत्य कामं गच्छेदेवमुभयोः शिवं भवति समावृ
त्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखोऽभ्यागम्योपसंगृह्य न बीभत्समान उदकमुपस्पृश्यान्तः सान्त्वयित्वा पूजयेद्यथोपदेशमास
ने भोजने भक्ष्ये शय्यायां वाससी वाससं निहितेन हीनतरवृत्तिः स्यात्तिष्ठन्नस्मै सव्येन पाणिना दक्षिणं वा कृमुपसंगृह्याचार्यमा
चामयेदन्यं वा समुदेतः स्थानासनचंक्रमणस्मितेष्वनुनिकीर्यन्नस्मिन्निहितो मूत्रपुरीषवातकर्मोच्चैर्भाषाहासष्ठीवनदन्तस्क शिव
२

रन निस्पृहं स्वयमात्मक्षेमं यत्नात् निश्चयानोः । तिदारे भार्यायां नोपस्पर्शनं भार्याचिरस्तंभश्चर्वाः परिवर्जयेद्वाक्येन वाक्यस्यप्रतिघातमाचार्य
स्य वर्जयेच्छ्रेयसां च ब्राह्मणदेवतासर्वभूतपरिवादाक्रोशांश्च वर्जयेद्विद्ययाच विद्यानां यया विद्यया न विरोधस्तत्पुनराचार्यं गत्वा
नियमेन साधयेन्न चास्य समीपे जृम्भ्यां निपरिमृज्जने कुर्याद्दुपकरणाद्यो त्सर्जनादध्यापयितु र्नियमो न नखलोमापाकरणं
श्राद्धमांसं मैथुनमिति वर्जयेद्दत्त्वा चाज्ञायां यथागमम्ः शिष्येभ्यो विद्यासंप्रदाने वर्तमानियमेषु च युक्तः स्यात्तथा गृहमेध
एवं वर्तमानं पूर्वापरान्त्सम्बध्यानात्मानं च क्षेमे युनक्ति मनसा वाचा प्राणेन चक्षुः त्वक् शिश्नोदरालंभणान्यास्त्रावान परिमृ
ज्जानो मृतत्वाय कल्पते ॥३॥ येन कृतावसथः सथः स्यादतिथिर्नत्तं प्रत्युत्तिष्ठेदनूत्तिष्ठेद्वा पुरस्ताच्चेदभिवादितः शेषभोज्यतिथी
नाः स्यान्नरसान्गृहे भुंजीत नव शेषमतिथिभ्यो नामार्थमभिरूपमन्नं पाचयेद्द्विशेषेयापुमान्गोमधुपर्कौ होर्वेदाध्याय समृद्ध
आचार्यऋत्विक्स्नातकः श्वशुरो राजा वा धर्मयुक्त आचार्यायर्त्विजे स्नातकाय श्वशुराय राज्ञ इति परिसंवत्सरादर्हयति षड्भ्यो गो
र्मधुपर्कश्च दधिमधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टमभावे उदकं षडंगो वेदश्छंदः कल्पो व्याकरणं ज्योतिषं निरुक्तं
शीक्षाछंदो विचितिरिति शब्दार्थारंभणानां तु कर्मणां समाम्नाय समाप्तो वेदशब्दस्तोसंख्याविप्रतिषिद्धांगानां च प्रधानैर्व्यपदेशो
इति न्यायवित्समयो नित्यं निराकृत्य यत्रागते भोजने स्मरेत्ततो विरम्योपोष्य श्वोभूते यथामनसंतर्पयित्वा संसाधयेद्यानेवंतमायानो
द्यावन्तानुजानीयादितरोप्रतीहायाः सोऽन्ते निवर्तेत सर्वान्वैश्वदेवे भागिनः कुर्वश्वांश्च चांडालेभ्यो नानहद्भ्यो ददातीत्येक उपेतः स्त्री

हि॰ध॰सू॰२७ याम्नुपेतस्यचोच्छिष्टंचर्जयेत्सर्वाण्युदकपूर्वाणिदानानियथाश्रुतिविहारेचयेचभृत्यानित्यास्तेषामनुपरोधेनसंविभागोविहितःकाम
मानंभार्यांपुत्रंचोपरुंध्यान्नत्वेवदासंकर्मकरंतथाचात्मानंउपरोधंकुर्वंस्तथाकर्मस्वसमर्थःस्यात्तथाप्युदाहरंत्यथैतांसामुनेर्मर्क्षःषो
३ डशारस्यवासिना॥द्वात्रिंशतगृहस्थस्यपरिमितंब्रह्मचारिणः॥आहिताग्निरनड्वांश्चब्रह्मचारीचतेत्रयः॥अश्नंतएवसिध्यंतिनैषांसि
सिद्धिरनश्नतामिति॥४॥जात्याचरसंशयेधर्मार्थमागतमग्निमुपसमाधायजातिमाचारंचपृच्छेत्साधुकृतंचेत्प्रजानीतेग्निरूपद्रष्टावायु
रूपश्रोतादित्योनुख्यातासाधुकृतांप्रतिजानीतेसाध्वस्माअस्तुवितथएषएनःसइत्युक्त्वाशास्त्रप्रतिपद्येताग्निरिवज्वलंनतिथिरभ्यागच्छ
त्तिधर्मेणवेदानामेकांशाखामधीत्यश्रोत्रियोभवतिस्वधर्मयुक्तंकुटुंबिनमभ्या छन्धर्मपुरस्कारोनान्यप्रयोजनःसोतिथिर्भवतितस्य
पूज्यायांशांतिःस्वर्गश्चतमभिमुखोभ्यागम्ययथावयःसमेत्योउपस्छायाथतमाहारयेन्नबकृपादमासनंभवतीत्येकेथास्यपादौप्रक्षाल
येशूद्रमिथुनौवित्येकेन्यतरोभिषेचनेस्यात्तथास्योदकमाहारयेन्मृन्मयेनेत्येकेनोदकमाहारयेदथसमावृत्तोध्यायनसंवृत्तिश्चोत्राधि
कानास्तमितआदित्यउदकालयनंविद्यतेसतःशक्त्याभोजयेच्छक्तिविपर्ययेणाक्लिश्वराध्येनावसथंदद्यादुपरिशय्यामास्तरणोपधानंसा
वस्तरणमभ्यंजनंचान्नसंस्कर्तारमाहूयव्रीहीन्यवान्वातदर्थान्निर्वपेदुद्धृतान्यन्नान्यवेक्षेतेदंभूया३इदंभूया३इतिरुष्यउद्धरेत्स्वैवं
ब्रूयाद्द्विषद्भूतोवानान्नमद्याद्दोषेणवामीमांसितस्यवापाप्मानं ।सतस्यभक्षयतीतिब्राह्मणं॥५॥सएषप्राजापत्यःकुटुंबिनोय शि॰
ज्ञोनित्यप्रततोयोतिथीनामग्निःसआहवनीयोयःकुटुंबेसगार्हपत्योयस्मिन्पच्यतेसोन्वाहार्यपचनःऊर्जंपुष्टिंप्रजांपशून्निष्टापूर्तमितिह २

हाणामश्नातिथयः पूर्वोतिथेरश्नाति पयसोपसिक्तमन्नमग्निष्टोमसंमितं सर्पिषोक्थ्यसंमितं मधुनातिरात्रसंमितं मांसेन द्वादशाहसंमितमुद
केन प्रजा वृद्धिरायुष्यं च प्रिया अप्रियाश्चातिथयः स्वर्गं लोकं गमयन्तीति यत्प्रातर्मध्यंदिने सायमिति ददाति सवनान्येव तानि यद
नुतिष्ठत्युदवस्यत्येव तद्यत्सान्त्वयित्वा भोजयति सा दक्षिणा प्र॰ सायत्सं॰ साधयति ते विष्णुक्रमा यदुपावर्तते सोवभृथ इति ब्रा
ह्मणमाहिताग्निं चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्य क्वावात्सीरिति व्रात्योदकं व्रात्य निर्वपास्त्विति पुराग्निहोत्रस्य हो
मादुपांशु जपेद्व्रात्य यथा ते प्रियं तथास्त्विति व्रात्य यथा ते वशस्तथास्त्विति व्रात्य यथा ते कामस्तथास्त्विति व्रात्य यथा ते निकामस्त
थास्त्विति जपेद्यदि सायमहुतेग्निहोत्रेतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्यातिसृज होष्यामीत्यतिसृष्टेन होतव्य
मनतिसृष्टश्चेज्जुहुयाद्दोषं ब्राह्मणमाहैकरात्रं चेदतिथीन्वासयेत्पार्थिवांल्लोकानभिजयति द्वितीययान्तरिक्षांस्तृतीयया दिव्यां
श्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमितांल्लोकानभिजयतीति हि ब्राह्मणमसमुदेतश्चेदतिथिरभ्यागच्छेदासन
मुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यादेवमस्य समृद्धं भवति ॥६॥ सर्ववर्णा पूर्ववशास्त्रविहितायां यथर्तु गच्छेता पुत्रास्तेषां क
र्मभिः संबंधो द्वयेन चाव्यतिक्रमश्चोभयोः पूर्ववत्यामसंस्कृतायां वर्णान्तरे च मैथुने दोषस्तत्रापि दोषवान्पुत्र एवोत्पादयितुः पुत्र एवेति
हि ब्राह्मणमिदानीमेवाहमीर्ष्यामि स्त्रीणां जनको नो पुरा रेतोधाः पुत्रं जनयति परेत्य यमसादने तस्माद्भार्यां रक्षन्ति बिभ्यतः पररेतसोप्रमत्ता र
क्षथ तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुर्जनयितुः पुत्रो भवति सांपराये मोघं वेत्ता तनुमेतमिति दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषां तेजो

व॰सू॰२.७ विशेषेणास्यवाप्योनविद्यतेतदन्वीक्ष्यप्रयुंजानः सीदृयस्यवरोदानंक्रयधर्मश्चार्थस्यस्यनविद्यतेविवाहेदुहितृमतेदानंकाम्यंधमार्थं श्रूय
तेतस्माद्दुहितृमतेऽधिरथं शतंदेयंतन्मिथ्याकुर्यादितितस्यात्क्रयशब्दः संस्तुतिमात्रंधर्मार्थसंबंधेस्केधनेनज्येष्ठंतोषयित्वाजीवसु
४ तेभ्योदायंविभजेत्समंक्लीबमुन्मत्तंपतितंचपरिहाप्यपुत्राभावेसपिंडोदयःप्रत्यासन्नस्तदभावआचार्य आचार्याभावेऽन्तेवासीऋत्वि
तदर्थेषुधर्मकृत्येषुवोपयोजयेद्दुहितावासर्वाभावेराजादयःहरेत्तज्ज्येष्ठोदायादइत्येकेदेशविशेषेकृष्णवर्णोऽक्षुद्रागावः कृष्णाभौमज्ये
ष्ठस्यरथःपितुःपरीभांडंचगृहेऽलंकारोभार्यायाज्ञातिधनंचेत्येकेतच्छास्त्रैर्विप्रतिषिद्धंमनुःपुत्रेभ्योदायंव्यभजेदित्याविशेषेणाश्रूय
तेतथापितस्माज्ज्येष्ठपुत्रंधनेननिरवसाययंतीत्येकयच्छ्रूयतेतथापिनित्यानुवादमविधिमाहुर्न्यायविदोयथातस्मादजावयःपशू
नांसहचरंतीतितस्मात्स्नातकस्यमुखंरेफायतीवतस्माद्वस्तश्चश्रोत्रियश्चस्त्रीकामतमावितिसर्वेऽपिधर्मयुक्तभागिनोयध
र्मेणद्रव्याणिप्रतिपादयेज्ज्येष्ठोपितमभागंकुर्वीत॥७॥जायापत्योर्नविभागोविद्यतेपाणिग्रहणाद्धिसहत्वंकर्मसुतथापुण्यक्रिया
सुद्रव्यपरिग्रहेषुचनहिभर्तुर्विप्रवासेस्त्रियानैमित्तिकेदानेस्तेयमित्तीत्युपदिशंत्येतेनदेशकालधर्माख्यातामातुश्चयोनिसंबंधे
भ्यःपितुश्चासप्तमात्पुरुषाद्यावतावासंबंधोज्ञायतेतेषांप्रेतेषूदकोपस्पर्शनंगर्भान्यूनंवर्जयित्वासंवत्सरान्मातापितरावेवतेषुहर्तार
श्चभार्यायांपरमगुरुसंस्थायांचाकालमभोजनमातुरव्यंजनानिकुर्वंतिकेशान्प्रकीर्यपांसूनोप्येकवाससःसकृदवगाह्यतसंस्तुमु शिवं
दकमुत्सिच्योत्तीर्यापविशंत्येवंत्रिरप्रतिसायाममुपयंतियत्तत्रस्त्रियआहुस्तत्कुर्वंतीतरेषुचैकेरतदेवापविशंत्येतस्मिन्कालेमात्याःकेश ४

स्मश्रूणिधापयंतेनसमाश्नुतावापयेरन्नहविहारिणइत्येकेनशानानध्ययनादधःशाय्योदकोपस्पर्शनान्याकालमनूचीनेपुष्यहंशाहः षडहंब्राह्म
णाहंवागुरुष्वनशनवर्जं संवत्सरंमातरिपित्तर्याचार्यइत्येकेब्राह्मणान्भूचीमिंज्ञवेलःसर्वकृत्येषुभोजयेद्दिशतःकालतःशौचतःसम्यक्प्रतिगृही
तृनितिदानोनिप्रतिपादयेद्यस्याग्नौनहूयतेयस्यचाग्नन्नदीयतेनतद्भोक्तव्यंनक्षारलवणहोमोविद्यतेतथायज्ञसंसृष्टस्याहविष्यस्यहोमउशी
चीनंमस्मात्पोश्नतस्मिन्कृकुर्यात्कृतमकृतंचाग्नौभवतिनस्त्रीकृकुर्यान्नानुपेतःआन्नप्राशनात्रूभीनाप्रयत्नाप्रवस्यायदिसंवत्सरादित्येकेयो
वनाद्वादिशोनप्रजानीगुरोपनयनादित्येकेनह्याधिकारशास्त्रेर्भवतीतितिसानिष्ठास्पष्टविस्वा ॥८॥ भिक्षणेनिमित्तमाचार्योविवाहोयज्ञोमातापित्रोर्बुभू
षार्हमेषाज्यमिच्छतम्बाहितस्यनियमविलोपेतत्रगुणान्समीक्ष्ययथाशक्तिदेयमिंद्रियप्रीत्यर्थस्यतुभिक्षणमनिमित्तंनतदाद्रियेतस्वकर्मब्राह्मण
स्याध्यायनमध्यापनंयज्ञोयाजनंप्रतिग्रहोदायाद्यः शिलोंछोन्यच्चापरिगृहीतमेतान्येवक्षत्रियस्याध्यापनयाजनप्रतिग्रहणानीतिपरिहाप्यदंड
युद्धाधिकानिक्षत्रियवद्वैश्यस्यचदंडयुद्धवर्जंकृषिगोरक्ष्यवणिज्याधिकंनानूचानमृत्विजंवृणीतेनपण्यमानमयोऽयोनधीयानोयुक्तोतद्योग
यथोपायमुपदिष्टोंतितथाप्रतिपत्तव्यंन्यस्तास्युद्धप्रकीर्णकेन्द्राप्राजालिपरान्मृष्टेतोनामायीवधंयरिचक्षतेशास्त्रेरांधिगतानामिंद्रियदौर्बल्य
द्विप्रतिपन्नानांशास्त्रानिर्वेषमुपदिशेद्यथाकर्मयथोक्तंतस्यचेष्टास्त्रगतिप्रवर्तेरन्राजानंगमयेद्राजापुरोहितंधर्मार्थकुशलं सब्राह्मणान्नि
यच्छेद्वलविशेषेणवधतास्यवर्जंनियमेरूपशोषयेदितरेषांवर्णानामाप्राणवियोगाद्वियोगात्समवेस्यतेषांकर्माणिदंडान्यप्रतिपद्येतनसंदेहेदंडंकुर्यात्
सुविचित्यत्वादेवप्रश्नेभ्योदंडायप्रतिपद्येतेवंवर्तमानोराजेहलोकेवाचंभिजयतिराज्ञःपंथाब्राह्मणेनासमेत्यतुब्राह्मणस्यैवपंथायानस्यायस्य
भाराभिनिहितस्यातुरस्यास्त्रियइतिसर्वैर्देयातव्योशिष्टयतिनमत्तोनासंस्वस्त्ययनार्थेनदातव्यः ॥ ९ ॥ धर्मचर्ययाजघन्योवर्णःपूर्वंपूर्वंवर्णमापद्य

स्वजातिपरिवृत्तौ च धर्मचर्यया पूर्वो वर्णो जघन्यं वर्णमापद्यते जातिपरिवृत्तौ धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत अन्यतराभावे कार्या प्रागग्न्याधेया
द्याधाने सती कर्मभिः संबध्यते येषां मितरंगः सगोत्राय दुहितरं न प्रयच्छेन्मातुश्च योनिसंबंधेभ्यो बंधुशीलश्रुतारोग्याणि बुध्वा प्रजासह
त्वकर्मभ्यः प्रतिपादयेच्छक्ति विवाहे शक्तिविषये णालंकृत्य दद्यादार्षे दुहितृमते मिथुनौ गावौ देयौ दैवे यज्ञतंत्र ऋत्विजे प्रतिपादयेन्मिथः का
मात्सांवर्तेत स गांधर्वो यथाशक्ति द्रव्याणि दत्त्वा वहेरन्स आसुरो दुहितृमतः प्रोथयित्वा वहरन्स राक्षसस्तेषां त्रय आद्याः प्रशस्ता यथायु
क्तो विवाहस्तथायुक्ताः प्रजा भवति पुत्रेण लोकान्जयति पौत्रेणामृतत्वं स्तुत अथ पुत्रस्य पौत्रेण नाकमाप्नोति ब्रध्नस्य विष्टपं दौहित्र
तत्संतिमुंचेतिय त्रीणि तमहङ्ग्य ब्राह्मं देवास्त्वधिकारिणः पायिमूर्ध ब्राह्मणेन नाप्रोक्षितमभिसंतिष्ठेताग्निं ब्राह्मणं चांतरेण नातिक्रा
मेदनुज्ञाप्य वातिक्रामेद् ब्राह्मणाश्च नाग्निमपश्च युगपद्धारयेन्नाग्नीनां च संनिवापं वर्जयेद्वचनात्प्रतिमुखमग्निमाह्रियमाणं नाप्रति
क्रिलं भूमौ प्रदक्षिणीकुर्वीत तष्टिं लभ्वात्मनः पाणिना संश्लेषयेत्सूर्याभ्युदितो ह निनाभ्रीयाद्गाग्यतो ह स्तिष्ठेत्सूर्याभिनिर्मुक्तो नाश्वान्वा
ग्यत आसीत श्वोभूत उदके सुपस्थस्थ वाचं विसृजेद्दान्तमितो प्राणमायच्छेद्दिस्येकेरचसंवायापकं ह स्वार्थं चासिसाधयिष्यन्नियमातिक्र
मे वान्यस्मिन्दोषफलसंशयेन तत्कव्यमेवमध्यायानध्यायसंशये त्वसक्षवद्भ्यादभिनिम्रुक्ताभ्युदितकुनखिश्यावदन्नग्रदिधिषु
[redacted]पतिपर्याहितपरीष्ट्य परिवित्ति परिवित्त परिविविदानेषु चोत्तरोत्तरस्मिन्नेशुचिकरनिर्वेषो गरीयानरीयाः स्वच्चाहिंसं चरितो भार्याभि
सेके ॥ १० ॥ सह देवमनुष्या अस्मिंल्लोके पुरा बभूवुरथ देवाः कर्मभिर्दिवं जग्मुरहीयन्त मनुष्यास्तेषां ये कर्माणि तथारभन्ते सह देवैर्ब्रह्मणा वामु

ष्मिन्लोके भवंत्यथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच मनुर्ज्ञानिः श्रेयसा चैनत्त्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे मासि श्राद्धमपरपक्षस्योत्तमेहन्यपरा
ह्णः श्रेयान् तथापरपक्षस्य जघन्यान्यहानि सर्वेष्वहःसु कृष्णपक्षस्य क्रियमाणे पितॄन्प्रीणाति कर्तुरस्तकालेऽभिनियमात्फलविशेषः प्रथमेह
नि स्त्रीप्रायमपत्यं जायते द्वितीये स्तेनास्तृतीये क्षुद्रपशुमान् चतुर्थे ब्रह्मवर्चसिनः पंचमे पुमांसः सो बह्वपत्यो भव्यापत्यो न चानपत्यः प्रमीयते
षष्ठे ध्वशीलोऽक्षशीलश्च सप्तमे कर्षे राद्धिरष्टमे पुष्टिर्नवमे एकखुरा दशमे व्यवहारे राद्धिरेकादशे कृष्णायसं त्रपुसीसं द्वादशे पशुमान् त्र
योदशे पुमांसः सो बह्वपत्यो दर्शनीयापत्यो युवमारिणस्तु भवन्ति चतुर्दशे आयुधे राद्धिः पंचदशे पुष्टिस्तत्र द्रव्याणि तिलमाषा व्रीहियवा आ
पो मूलफलानि चैतानि मासं प्रीणन्ति पितॄन् लोके विज्ञायते स्नेहवति त्वेवान्ने तीव्रतरा पितॄणां प्रीतिर्द्राघीयांसं च कालं तथा धर्माहृतेन
द्रव्येण तीर्थे प्रतिपन्नेन संवत्सरं गव्येन मांसेन प्रीतिर्भूयांसमितो माहिषेणैतेन ग्राम्यारण्यानां पशूनां मांसं मेध्यं व्याख्यातं खड्गोपस्तरणे खड्
गमांसेनानन्त्यं कालं तथा शतबलेर्मत्स्यस्य मांसेन तथा वार्ध्राणसस्यैतेनारण्यानां पशूनां ॥११॥ मेध्यं मांसं व्याख्यातं प्रयतः प्रसन्नमनाः
सृष्टो भोजयेद्ब्राह्मणान्ब्रह्मविदो योनिगोत्रमंत्रांतेवास्यसंबंधान्नार्थापेक्षो भोजयेद्गुणहान्यां तु परेषां समुदेतः सोदर्योपि भोजयितव्य ए
तेनांतेवासिनो व्याख्याता अथाप्युदाहरंति संभोजयनी नाम पिशाचभिक्षा नैषा पितॄन्गच्छति नोत देवान्निहैव सा चरति क्षीणपुण्या शा
लांतरे गौरिव नष्टवत्सेहैव संभुंजती दक्षिणा कुलात्कुलं विनश्यतीति तुल्यगुणेषु वयोवृद्धः श्रेयान्द्रव्यकृशश्चेप्सन्पूर्वेद्युर्निवेदनमपरेद्युः
द्वितीयमामंत्रणं त्रिः प्रायमेके श्राद्धमुपदिशंति यथा प्रथममेवं द्वितीयं तृतीयं च कार्यं सर्वेषु वृत्तेषु सर्वतः शेषं समवदाय प्राशीयादुदी
च्यां वृत्तिरस्त्वासनगतानां हस्तेषूदपात्रानयनं तिलानुप्रकिरणं वोद्धरिष्याम्यग्नौ च करिष्यामीत्यामंत्रयते काममुद्ध्रियतां का

हे॰ध॰सू॰२७ ममग्नो च क्रियतां क्रियतामिति स्वधाउक्षरेज्जुहुयाच्छ्वभिरपपात्रैश्च श्राद्धस्य दर्शने परिचक्षते शिपिविष्टः परतल्पगाम्या युधीपुत्रः श्वित्रीकु
शीदृषलीपतिः सर्वविक्रयीराजभृत्यो पञ्जातोऽसन्नोऽब्राह्मणापक्तिदूषकाः इत्येते श्राद्धे भुञ्जानाः पंक्तिदूषणा भवन्त्यथाप्युदाहरन्तिवेदाध्यायीपचो
६ ग्निः त्रिसुपर्णो ज्येष्ठसामिकः ब्राह्मदेयानुसंतानीपंचैते पंक्तिपावनाः न च नक्तं श्राद्धं कुर्वीतारब्धे वा भोजने आसमापयेत् ॥१२॥
विलयनं मथितं पिण्याकं मधुमांसं च वर्जयेत् कृष्णधान्यं शूद्रान्नं ये चान्ये नाश्यसंमताः अहविष्यमनृतं क्रोधं येन च क्रोधयेत् स्मृतिमि
च्छन्सोमेधां स्वर्गं पुष्टिं द्वादशैतानि वर्जयेद्धोनाध्यक परिज्ञान्वा छायायां दृष्ट्वा वणमुदकमुपस्पृश्य त्रीनन्नाग्निपक्व रात्रिर छायोपगतस्थानास
निकः संवत्सरं व्रतं चरेत् तदेतद्दशावत्सरं शास्त्रमित्यक्ष्वस्तेति स्वश्राद्धं वाहियामास्तु पयः शुचौ देशे सः स्कुर्वीत तितत्रनवानि व्यापि
येरन्नः स्क्रियन्ते येषु च भोज्यते तानि च भुक्त्वा पञ्चयां दद्यात् समुद्रेता स्वभोजयेत् तत्रान्नं न भूञ्जीयात् छिद्रं प्रयस्तेनानि भुक्त्वा पञ्चयां दद्यात् स्वसंव
सरं तेषामुत्तमं लौहे नाज्येन कार्यमानं च कारयेत् प्रतिच्छन्नं तस्योत्तरार्धे ब्राह्मणान् भोजयेदुभयायष्यति ब्राह्मणाः स्व भुञ्जानान्मा
नेच पितृनिस्फ पदिश्यति कृताकृतमत ऊर्ध्वं श्राद्धेन तृप्तिः हि वेदयन्ति पितरः पुष्टिकामास्ति ध्ययागोरसर्षपानां चूर्णानि का
रयित्वा तैः पाणिपादं प्रक्षाल्यकर्णौ स्फुरवेदास्यय इतानातिवातैस्तदासनो जिनं यस्तस्य प्रथमः कल्पो दक्षिणाभिमुखो वाग्यता
कोजीतनायुष्यं स्ववं सुखस्य भोजनं मातुरिस्फपादिशं त्योदुंबरस्व मसः स्फवर्णानाभो भोजनीयः प्रशस्तोन चान्येनातिभोक्तव्यो यावल्ला
सः सन्नयन्नस्कंदयन् अपातयन्नाभिजिह्वीत भिजिह्वीतवा स्कृत्स्नं ग्रासं संयम्येतसहां गुष्ठं नस्वमुखशब्दं कुर्यात् पाणिं च नावधूनुयात् स्वयमुपवाध्वौं
पाणिधास्येदाप्योदकीभावात्तलोग्निमुपस्पृश्य द्विर्यावन्नाभुञ्जीतान्यमूलफलेभ्यः स्नाली पानुदृश्यानि च वर्जयेन्नेत्यमिकं च श्राद्धं स्नेहवद्रद्यात् ॥१३॥ ६

सर्पिर्मांसमिति प्रथमः कल्पोऽभावे तैलं शाकमिति मध्यमः कल्पोऽधिकः ॥ आश्वेन कल्पेन सपिब्राह्मणान्भोजयेत्तिलानां द्रोणं येनोपायेन शुक्ल
लं तथा दद्यात्तथा दद्यात्समुदेता ॥ श्रवभोजयेदुदगयन आपूर्यमाणपक्षे तिष्येण स्थालीपाकं ॥ श्रपयित्वा महाराजमिष्ट्वा ब्राह्मणं भोजयित्वा
पुष्टिकामः सिद्धिं वाचयेदेवमहरहरापरस्मात्तिष्याद्द्वितीये त्रीन् ॥ तृतीय एवमभ्युच्चयेन संवत्सरं महान्तं पोषं पुष्यत्यादित एवोपवा
सआत्तेज संभोजनं वर्जयेदुस्मतुषाधिष्ठानं च पदा पादस्य प्रक्षालनं वर्जयेदधिष्ठानं च पादयोः ऊरवोल्लेखनं च जानुनी वास्याधानं ज
घायानं रवैश्व नखच्छेदनं वादनं स्फोटनं निष्ठीवनं नीचाकारणाद्यन्यो न्यत्परिचक्षते यो त्वाच धर्मयुक्तेषु द्रव्यपरिग्रहेषु प्रतिपादयिता
चतीर्थे यंता चातीर्थे पतेनमयः ॥ स्यात्संग्रहीता च मनुष्यान्भोक्ता च धर्माविप्रतिषिद्धान्भोगानेवं वर्तमान उभौ लोकावभिजयति ॥१४॥
चत्वार आश्रमा गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थमिति तेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति सर्वेषामुपनयनप्रभृति समानमा
चार्यकुले ब्रह्मचारिवासो बुध्नाकर्माणि याय त्कामयेत तदारभेत सर्वेषामनुत्सर्गो विद्याया यथा विद्यार्थस्य नियम एतेनैवान्तमनुप्रयुंजा
नस्य वाचार्यकुले शरीरन्यास इति ब्रह्मचारिवासोऽथ परिव्राजो नत एव ब्रह्मचर्यवान्प्रव्रजति तस्योपदिशन्त्यग्नेरनिकेतः स्याद्शर्मा
शरणो मुनिः स्वाध्याय एवोत्सृज्यमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्यानिहोऽनमुत्रश्चरेत्तस्य मुक्तमाच्छादनं विहितं ॥ सर्वतः परि
मोक्षमित्येके सत्यानृते सुखदुःखे प्रियाप्रिये वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेद्बुद्धे क्षेमप्रापणमिति तच्छास्त्रैर्विप्रतिषिद्धं
बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत तेन परं व्याख्यातमथ वानप्रस्थो नत एव ब्रह्मचर्यवान्प्रव्रजति तस्योपदिशन्त्येकाग्निरनिकेतः स्या

हि॰ध॰सू॰२७

८

द्धा र्मा शरणो मुनिः स्वाध्यायउत्सृजमानो वाचं तस्यारण्यमाच्छादनं विहितं ततो मूलैः फलैः पत्रैस्तृणैर्यो शिनिवर्तयंश्चरेद् ततः प्रवृत्तान्यापो वायुराकाशउत्त
रउत्तरः संयोगः ॥१५॥ अथवानप्रस्थस्यैवानुपूर्व्यमेकउपदिशन्ति विद्याः समाप्य दारं कृत्वाग्नीनाधाय कर्मारभेत सोमावराध्यानियानि श्रूयंते
गृहान्कृत्वा सप्रजः सदारः सहाग्निभिर्बहिर्ग्रामाद्वसेदेकाकी वा शिलोंछेन वर्तयेत् संवत्सरावराध्येन चात ऊर्ध्वं प्रतिगृह्णीयादभिषिक्त श्व कुहुयाच्च
नेरयोभ्यवेयादभिभन्नाभिमुख आदित्यमुदकमुपस्पृशेत्सर्वत्रैवोदकोपस्पर्शनादि श्रद्धिः क्षारलवणमधुमांसानि च वर्जयेत्तस्यद्वंद्वं
पात्राणामेक उपदिशन्ति या कार्यभोजनार्थे वासमीपस्थ दात्रकाजानामेकैकमादायेत्तराणि दत्वारण्यमवतिष्ठेत तस्यारण्येनैव होमो वृ
त्तिः प्रतीक्षाच्छादनं विहितं येषु कर्मस्तु पुरोडाशाश्चरवस्ते कार्याः सर्वे चोपांशुः सहस्वाध्यायेन नारण्यमभ्याश्रावयेदग्न्यर्थं शरणमाका
शोऽस्वयमनुपस्तीर्णे शय्यासने नवे सस्ये प्राप्ते पुराणमनुजानीयाद्भूयांसमिच्छन्नस्य हमेव पात्रेण प्रातरर्थमाहरेत्ततो मूलैः फलैः पत्रैस्तृ
णैर्योशितिवर्तयंश्चरेद् ततः प्रवृत्तान्यापो वायुराकाश इत्येतत्तरउत्तरः संयोगः फलतो विशिष्टः ॥१६॥ अथ पुराणे श्लोकावुदाहरंत्यष्टाशीति
सहस्राणि ये प्रजामीषिरे ऋषयः दक्षिणेनार्यम्णाः पंथानं ते श्मशानानि भेजिरे। अष्टाशीतिसहस्राणि ये प्रजां नेषिरे ऋषयः। उत्तरेणार्य
म्णाः पंथानं तेमृतत्वं हि भेजिरे इत्यूर्ध्वरेतसां प्रशंसाथापि संकल्प्य सिद्ध यो भवंति यथा वर्णप्रजादानं दूरे दर्शनं मनोजवं तायच्चान्यदेवं यु
क्तं तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानेतानाश्रमानेके ब्रुवते त्रैविद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयंते व्रीहियव
यवपश्वाज्यपयःकपालपत्नीसंबंधान्युच्चैर्नीचैः कार्यमिति प्रतिविध्याचारो न प्रमाणमिति मन्यंते यत्तु श्मशानमुच्यते नानाकर्मणामेषोंते पुरु
षः संस्कारो विधीयते ततः परमानंत्यं फलमपरिमितं स्वर्ग शब्दः श्रूयते थाप्यस्य प्रजापतिममृतमाम्नायाहप्रजामनु प्रजायते तद्दुते

श्री

८

मर्त्यामृतमित्यथापि स एवायं विरूढः पृथक्पृथक्पक्षेणोपलभ्यते दृश्यते चापि सारूप्यं देहत्वमेव चान्यत्वे शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां सांपरायेण
कीर्तिः स्वर्गं च वर्धयंस्येवमपरोऽपरः परेषामाभूतसंप्लवात्ते स्वर्गजिता पुनः स्वर्गे तिज्जार्थं भवंतीति भविष्यत्पुराणे तथापि प्रजापतेर्वचनात्त्रयीं विद्यां ब्रह्मचर्यं
प्रजापतिः श्रद्धां तपो यज्ञमनुप्रदानं य एतानि कुर्वते ते इहास्माकं सह सहस्मा रजो भूत्वा ध्वंसंते न्यत्प्रशंसंतीति तत्र ये पापकृतस्त एव ध्वंसंति यथानयोर्वनस्प
तेर्न परास्ति संति तेषामस्मिन्लोके कर्मफिः संबंधो विद्यते तथा धरस्मिन्कर्मफलैरथापि प्रजापतेऋषीणामित्यर्थः सर्गस्तेषां प्रकृतयः पराज्व
लं स उपलभ्यते स्यानुकर्मचयवेन तपसा वा सशरीरोज्ज्वलं लोकं जयेदभिस्वर्गं लोकं जयतीति संकल्पसिद्धिः स्यान्न ततो ज्येष्ठमाश्रमायां ॥२४॥
व्याख्याताः सर्ववर्णानां साधारणा वैशेषिकधर्मा राज्ञस्तु विशेषाद्वक्ष्यामो दक्षिणद्वारं वेश्म पुरं च मापयेदन्यत्तरस्यां पुरि वेश्म तस्य पुर
स्तादावसथस्तदामंत्रणमित्याचक्षते दक्षिणेन पुरं दक्षिणोद्द्वारः सभा कार्या यथोभयतः संदृश्येत बहिरंतरं च सर्वत्रैवाजस्रा अग्नयस्यु
रग्निपूजा च नित्या तथा गृहमेध आवसथेऽश्रोत्रियावराध्यानतिथीन्वासयेत्तेषां पूजा श्रेयस्यात्मनः कार्या तेभ्यो यथागुणमावसथमन्न
पानं च विदध्यः सर्वाणीत्यस्य अगुरून्मात्यांश्च नातिजीवेन्न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां वावसीदेदभावाद्बुद्धिपूर्वं वा कश्चित्सभायां म
ध्येऽधिदेवनमुद्धृत्या वोक्ष्याक्षान्निवपेद्युग्मान्वैभीतकान्यथार्थानार्याः शुचयः सत्यशीला दीवितारः स्युः सर्वधर्मेणोपायांस्वधर्मानुष्ठमानित्य
मेषु च युक्तः स्याद्युधय हयाटसमीलवाद्रिवा विदिता राजाधीनेभ्योऽन्यत्र न विद्येरन्क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं विद्यते भृ
त्यानामनुपरोधेन क्षेत्रं वित्तं च ददद्ब्राह्मणेभ्यो यथार्थमनंतांल्लोकानभिजयति ब्राह्मणस्वान्यपाजिहीर्षमाणो राजा यो हन्यते तमात्मयूपेन
ज्ञेनेत्सदक्षिणेनेति ॥१८॥ एतेनान्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजो ग्रामेषु निगमेषु चार्यान्शुचीन्सत्यशीलान्धर्मार्थं कुर

हि॰ध॰सू॰२७

८

लाभप्रजागुप्त्यर्थेनिदध्यात्तेषांशुरुचयास्तथागुणाएवस्युःसर्वतोयोजनंनगरंतस्करेभ्योरक्ष्यंक्रोशोग्रामेभ्यस्तत्रयन्मुष्यतेतैस्तत्प्रतिदाप्यंधार्म्यं
शुल्कमवहारयेदकरःश्रोत्रियःसर्ववर्णानांस्त्रियःकुमाराश्चप्राग्व्यंजनेभ्योयेचविद्यार्थावसन्तियेचधर्मपराःशूद्राश्चपाद
वनेक्तुअधमूकबधिररोगाविष्टाश्चयेव्यर्थाद्रव्यपरिग्रहेरबुद्धिपूर्वमलंकृतोयुवापरदारमनुप्रविशन्कुमारींवावाच्योबुद्धिपूर्वंतुदुष्टभा
वोदंड्यःसतिपातेवृषणशिश्नच्छेदनंसवृषणस्यकुमार्यांतुस्वान्यादायवास्योपराज्ञातिभृतेरक्ष्येचातउर्ध्वंमैथुनाच्चरितनिर्वेषंस्वामिभ्योवसृजे
त्परितयथापुरंधर्मसंबंधीनसगोत्रस्थानीयांपरेभ्यःसमाचक्षीतकुलायहिस्त्रीप्रदीयतइत्युपदिशन्तिसदिंद्रियदौर्बल्याद्विप्रतिपन्नमवशि
ष्टंहिपत्त्वंपाणेस्तदत्यतिक्रमेपुनरुभयोर्नरकोनियमारंभणोहिवर्षीयानभ्युदयएवमारंभयाद्यस्यान्वायआर्यःशूद्रायांवध्यःशूद्रा
आर्यायांदारस्वास्यकर्षयेत्सवर्णायामन्यपूर्वायांसकृत्संनिपातेपादःपतत्येवमभ्यासेपादःपादश्चतुर्थेसर्वंजिह्वाछेदनंशूद्रस्या
र्यांधार्मिकमाक्रोशतोवाचिपथिशय्यायामासनेचसमीभवतोदंडताडणंपुरुषवधेस्तेयेभूम्यादानेपरदारानुप्रवेशेइतिस्वान्यादाय
वध्यश्चक्षुर्निरोधस्त्वेतेषुब्राह्मणस्यनियमातिक्रमेणमन्यंवाराहसिबाधयेद्दासमापत्तेरसमापत्तौनाश्यआचार्यःऋत्विक्स्नातक
श्चप्रभुर्जेराज्ञेतित्राणंस्युरन्यत्रवध्यात्।१९।क्षेत्रंपरिगृह्योत्थानाभावात्फलाभावेयःसमृद्धःसभावितदपहार्योवोशितःकीनाश
स्यकर्मन्यासेदंडताडनंतथापशुपस्यावरोधनंचास्यपशूनांहित्वाव्रजमानिनःकर्षयेत्सपशूनांतिपातयेदपरुध्यमाणेनाशानेवास्वामिभ्यो
वसृजेत्प्रमादादरण्येपशून्तुयस्यस्थान्नाममानीयस्वामिभ्योवसृजेत्सुनःप्रमादेसकृदेवरुध्यतेततउर्ध्वंनस्वर्शीपरेपरिग्रहमविद्वानादद्दानः

ध·सू·२७ एधोदके मूले फले पुष्पे शाक इति वाचावाच्योविदुषो वाससः परिमोषया मदंड्यः कामकृते तथा प्राणसंशये भोजनमाददानः प्रा
ह्ममित्तित्ते दंड्यं कर्मणि राजानमेनः स्पृशति प्रयोजयिता मंता कर्तेति स्वर्गनरकफलेषु वर्तेरन्नि चोदक्ये मेध्या विनो धर्मे सर्वाविनियार्ति
१ नालिंगत्तो दैवेनेति विचिंत्य पुण्याहेयाम विधे घामोत्ते राजपस्कस्तयतः समाख्याने सर्वोनुमंते मुख्यः सत्यं प्रश्नं ब्रूयाद्नृते राज
दंडं प्रणयेन्नरकश्चात्राधिकः सांपराये सत्ये स्वर्गः सर्वभूतः प्रशं साच सा निष्ठा या विद्या स्त्रीषु शूद्रेषु चाथर्वणस्य
वेदस्य शेष इत्येकपदिशं यथाप्याचार्यवचनं ना समुदेत्ताय नाश्रोत्रियाय नाब्राह्मणाय कृच्छ्रार्धे मसमाप्तिः
समाम्नातेन लक्षणा कर्मणानुसरसे माप्यते तत्र लक्षणं स्त्रीभ्यः सर्ववर्णेभ्यश्च धर्मशेषान्प्रतीयाद्दे
वंवर्त्तमानः सचान्लोकानभिजयति सर्वान्लोकानभिजयन्ति ॥२०॥ इतिहिरण्यकेशीसूत्रे सप्त
विंशतिप्रश्नेष्टमः पटलः ॥८॥ ॥समाप्तः सप्तविंशतिप्रश्नः ॥२७॥ श्रीलक्ष्मीकेशवार्पयमस्तु ॥
शके १७८७ पार्थिवनामसंवत्सरे दक्षिणायने आश्वीनशुक्लप्रतिपदि देवधरोपनामक शिवरामेण लिखितं ॥ शुभम
स्तु ॥ ७ स्वार्थे ७ परार्थे च ७ ७ ७ ७ ७ ७ ७ ७

३०

हिरण्यकेशिसूत्र